CC-0. In Public Domain. Digitization by eGangotri

THE
HARIDAS SANSKRIT SERIES
179

PARAMALAGHUKALĀ

(Questions and Answers of Paramalaghu–Manjusa)

by

Pt. Shobhakant Jha.

CHOWKHAMBA SANSKRIT SERIES OFFICE
VARANASI-221001 (India)
1977

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

© The Chowkhamba Sanskrit Series Office
K. 37/99, Gopal Mandir Lane
Post Box 8, Varanasi-221001 (India)
Phone : 63145

Second Edition
1977
Price Rs. 3-00

Also can be had of
Chaukhamba Amarabharati Prakashan
Oriental Publishers & Book - Sellers
Post Box No. 138
K. 37/118, Gopal Mandir Lane, Varanasi-221001
(INDIA)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

किञ्चित्प्रास्ताविकम्

सुरसरस्वतीप्रणयभाजो विद्वांसोऽन्तेवासिवर्गाश्च !

नाविदितमस्ति कस्याऽपि विचक्षणस्य यदाध्यात्मिकाऽधिदैविकाऽधिभौतिकतापत्रयात्यन्तिकनिवृत्तिनिदानमनुसन्दधतो मुनिमहर्षयः श्रुतिस्मृतीहासपुराणादिप्रभृतिनियतात्मतत्त्वसक्षात्कारमेव तदुपायमाकलयाञ्चक्रुरिति ।

तदुपायपरिज्ञानसम्पत्तिश्च शब्दशास्त्राधीनैवेति हेतोः शब्दशास्त्रस्य सकलप्रमाण गोष्ठीश्रेष्ठस्य कियन्मात्रं माहात्म्यमित्यपि निश्चप्रचमेव । तत्राद्यत्वे शब्दशास्त्रेषु पाणिनिव्याकरणस्यैव सर्वातिशायि गौरवमुज्जृम्भते । यतस्तस्यैव कतिपये महाभाष्यवाक्यपदीप्रभृतिग्रन्थाः सकलग्रन्थोन्नतमस्तकाः सकलशास्त्रविषय—प्रामाण्यदृढीकरणपटीयांसः प्रतिभान्ति चिरन्तनवेलातः किन्तु विलसत्यपि महाभाष्ये विलसन्त्यामपि वाक्यपद्यां शाब्दिकमतनिराकरिष्णुवादिव्रातमतविध्वंसनपूर्वकशाब्दिकसिद्धान्तस्फोरभणसर्थमेकमपि सकलजनावगाहमनवलोक्य ग्रन्थं महाभाष्यविचरणचतुरशेमुषीजुषा वैयाकरणशिरोमणिभूतेन भट्टोजिदीक्षितेन गम्भीरभाष्योदधेः कौस्तुभ इव शब्दकौस्तुभः प्राकाशि । ततोऽपि समेषां शब्दशास्त्रपदार्थतत्त्वप्रकाशः कनीयसा समयेन दुर्लभ एवेति निर्ध्याय कारिकाभिस्तदीयकिञ्चिदंशभूतशब्दमूलधातुप्रत्ययनिपातप्रातिपदिकादिपदार्थतत्त्वं विशेषेण वाक्यार्थानुसन्धानोपयोगभाजनं स एव प्रकाशयामास । तासामप्याशयं दुर्वेद्यंविभाव्य कौण्डभट्टो भूषणेन सूक्ष्मा अपि कारिकाः स्थूला व्याख्यानेन निर्ममे ।

तत्रापि कतिपयान्त्रुटिमाकलय्य वैयाकरणावतंसश्रीनागेशभट्टो बृहन्मञ्जूषा- लघुमञ्जूषाभ्यां तान्त्रुटिं प्रपूरयामास । किन्तु ताभ्यामपि सर्वजनसाधारण्येन शाब्दबोधोपायकपदार्थपरिज्ञानं झटिति न स्यादिति सन्दिहानोऽतिसंक्षिप्तकलेवरां 'परमलघुमञ्जूषां सकलशब्दशास्त्रोपयोगिपदार्थमञ्जूषामिव विनिर्माय सकलाज्ञविज्ञविज्ञतमजनमनांसि समणुरञ्जयन्नीतप्रणतिकुसुमाञ्जलिर्ग्रन्थकारः कीदृशो जात इति नाप्रत्यक्षम् । किन्तु तथाऽप्यल्पतमशब्दैर्बह्वर्थंप्रतिपादनेन मीमांसकतार्किकाशेषमतखण्डनेन संक्षिप्तकलेवराया अपि 'परमलघुमञ्जूषायाः' अल्पबुद्धयनवगाह्यत्वमेव जातमिति निश्चिन्वन्ति तत्त्वविदः । अथ च तावता युक्तिप्रमाणादिना तार्किकादिमतखण्डनं न सम्यक् सम्पद्यते इति कृत्वा विचिकित्सा न ध्वसते, किन्तु वर्धत एव नितराम् । ममाप्येतग्रन्थाध्ययनाऽनेहस एव भावानाऽजनि यदेतन्नग्रन्थस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

काऽपि टीकैतादृशी परमावश्यकी, यया सकलतार्किकमीमांसकादिखण्डिमतात-याथार्थ्यं शाब्दिकसिद्धान्तनादविस्फोरणश्च प्रभवेत्। किन्तु भूयांसो विद्वांसस्तादृशीमनवद्यां टीकां विरचय्य प्रकाशयितुमनसः प्रोल्लसन्तीति कर्णाकर्णिकिया विज्ञायामन्दमामोदमाप्नुवानो निर्भरोऽभूवम्। यतः सकलजनवाञ्छनीयटीकया नयनपुरस्कृतयाऽवश्यं त्वरयैव वाञ्छापूर्तिर्यायात्। किन्तु हतभाग्यत्वादस्मदादीनामिदानीमव धिसा वाञ्छा न शाम्यति, यतः सर्वाऽपि तादृशी टीका कुलवधूरिव प्रकाशपतिविधुरा लज्जापटसमावृता विद्वद्गेहकोणे एव मुखं मुकुलयन्ती विराजते।

तृतीयाब्दे चौखम्बासंस्कृतपुस्तकालयसम्पादकपण्डितश्रीरामचन्द्रझाव्याकरणाचार्यमहोदयप्रेरणया टीकातः प्राक् तत्प्रश्नोत्तरी एव मया निरमायि। यद्यपि ममेयम्प्रश्नोत्तरी कामपि नूतनशैलीमनुसरन्ती जनसन्तोषविधायिनी स्यादिति मानसी दृढप्रतीतिरस्ति तथापि विद्वज्जनघृणास्पदभाजां प्रश्नोत्तरीलेखकानाम्परिचयमनुस्मरन् विशिष्टस्थलपरिशिष्टं विनिर्माय स्वमात्मानमतूतुषम्। किन्तु प्रकाशनसमये उक्तझाजीमहोदयपरामर्शेन तत्परिशिष्टलेखो भूषणप्रश्नोत्तरीसाहित्येन प्रकाशमानो महत्त्वमावहेदित्यात्मकेनाऽहमधुना केवलां 'परमलघुकलां' (परमलघुमञ्जूषाप्रश्नोत्तरीम्) निक्षिप्तसर्वाधिकारश्रेष्ठिश्रेष्ठिहरिदासगुप्तात्मजश्रीजयकृष्णदासगुप्तमहाशयद्वारा प्रकाश्य विद्वत्पुरत उपस्थापयामि। आशासे च मदीयभूषणप्रश्नोत्तरी परिशिष्टसमञ्चिताऽपि विद्वत्परीक्षार्थिविद्यार्थिजनमनांस्यवश्यमनुरञ्जयेदिति।

अथ च मदीयोत्साहविधायिव्याकरणाचार्यपण्डित श्रीरामचन्द्रझाजीमहाशयो मया कियत्प्रशंसनीय इति किं वच्मि। एतदीयोत्साहेन विद्वन्मण्डल्यपि सहसैव समुदेष्यतीति विश्वासः। अथेमां स्वकीयप्रथमकृतिं दरभङ्गामण्डलान्तर्गततरुवनीग्रामनिवासिचन्दतर्कशास्त्रकाननविहरणपञ्चानन—वाराहीसीतारामीयसंस्कृतविद्यालयप्रधानाध्यापकस्वर्गीय गुरुवर पण्डित राधाकृष्णझाशर्म्मचरणारविन्दयोः सानुरागमर्पयन् कृतकृत्योभवामि। अथ प्रस्तुतपुस्तकप्रकाशनसञ्जातत्रुटिसंशोधनक्षमतामादधाना एव विद्वांसोऽन्तेवासिवर्गाश्च मदीयाम्परमलघुकलामुपाददीरन्निति मे विश्वासो द्रढीयानिति विरमति—

श्री रामनवमी
वि० सं. २००४

विदुषां वशंवदः—
—शोभाकान्त झा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रश्नानामनुक्रमणिका

क्रमाङ्काः		पृष्ठाङ्काः
१. शब्दश्चाप्तोपदेशः प्रमाणम्०	...	१
२. तद्धर्मावच्छिन्नविषयकशाब्द०	...	२
३. तार्किकमतसिद्धशक्तिस्वरूपम्०	...	४
४. शाब्दिकमतसिद्धशक्तिम्०	....	५
५. शब्दार्थयोस्तादात्म्यम्०	...	६
६. शक्तिः साध्वसाधुशब्दसाधारणी०	....	७
७. शब्दः कतिविधः०	...	९
८. लक्षणायाः स्वरूपम्०	...	१४
९. व्यञ्जनायाः स्वरूपम्०	...	१६
१०. ननु कोऽयं वृत्त्याश्रयः शब्दः०	....	१८
११. कस्तावत् स्फोटपदार्थः०	...	२०
१२. शाब्दबोधे आकांक्षाज्ञानस्य०	...	२२
१३. योग्यता स्वरूपसती०	...	२३
१४. प्राचीनैरासत्तिज्ञानस्य कारणत्वं०	...	२५
१५. कीदृशतात्पर्यज्ञानस्य शाब्दबोधे०	...	२६
१६. फलव्यापारयोः प्रतिपदव्यावृत्ति०	....	२७
१७. फलव्यापारयोर्धातूनां कीदृशी श०	....	२८
१८. फलं धात्वर्थो भावना प्रत्ययार्थं०	...	२९
१९. यावत्सिद्धमसिद्धं वेत्यादि०	....	३१
२०. सकर्मकत्वाऽकर्मकत्वलक्षणे०	...	३२
२१. कस्तावज्ज्ञाधात्वर्थः०	...	३३
२२. लकाराणां कृतौ शक्तिर्नतु कर्तरि०	...	३४
२३. आख्यातार्थे धात्वर्थो विशेषणम्०	....	३७

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रमाङ्काः		पृष्ठाङ्काः
२४. प्रथमान्तार्थमुख्यविशेष्यकशाब्द०	...	३८
२५. निपातानां द्योतकत्वं वाचकत्वं वा	...	३९
२६. चन्द्र इव मुखमित्यादौ लक्षणा०	...	४१
२७. घटो न पट इत्यत्र तार्किकमतं०	...	४३
२८. विधिरत्यन्तमप्राप्तौ नियमः०	...	४४
२९. निर्दुष्टं वर्तमानत्वं परिष्कृत्य०	...	४६
३०. वै० मतं लिङ्पदशक्यतावच्छेदकं०	...	४८
३१. भाट्टाभिमतं विध्यर्थं निरूप्य०	...	५०
३२. प्राभाकराभिमतं लिङर्थं निरूप्य०	...	५१
३३. नैयायिकाभिमतं लिङर्थं निरूप्य०	...	५२
३४. नागेशाभिमतं कारकत्वकर्तृत्व०	...	५४
३५. निष्कृष्टमीप्सितकर्मलक्षणम्०	...	५६
३६. कर्मत्वलक्षणघटकप्राधान्यस्य०	...	५७
३७. तार्किकैः कर्मलक्षणं कीदृशमुक्तम्०	...	५८
३८. वैयाकरणाभिमतं करणलक्षणं०	...	,,
३९. सम्प्रदानलक्षणं परिष्करणीयम्०	...	५९
४०. नागेशदिशाऽपादानलक्षणम्०	...	६०
४१. अधिकरणलक्षणम्०	...	६२
४२. शब्दानां जातौ शक्तिर्व्यक्तीनाम्०	...	६३
४३. लिङ्गसंख्याकारकादयः०	...	६४
४४. पदानां शाब्दबोधे भासमानत्वे०	...	६६
४५. अपदं न प्रयुञ्जीतेति०	...	६८
४६. समासशक्तिनिरूपणम्०	...	६९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ श्रीशारदाशरणम् ❀

परमलघुकला

(परमलघुमञ्जूषाप्रश्नोत्तरी)

यदीयपदसेवनाद् विधिहरी प्रमोदोदधी ।
स्वकर्मनिरती चिरं विलसतः समस्तक्षितौ ॥
अमर्त्यमनुजस्पृहालसितवस्तुसम्पूरकः ।
शमं स तनुतादुमासहितशङ्करोऽनारतम् ॥ १ ॥

माता यस्य नितान्तधर्मनिपुणा नाम्ना "भवानी" श्वरी ।
तातः श्री "जयदेव" एव लसति ज्ञानेरतो भूतले ॥
"राधाकृष्ण" गुरुः समस्तविदितो विद्यानिधिर्यस्य सः ।
'शोभाकान्त'सुधीः करोति परमां लघ्वीं कलां मैथिलः ॥ २ ॥

१—(प्रश्नः) शब्दश्चाप्तोपदेशरूपः प्रमाणमिति केनोपष्टम्भेनोत्थितः ? कश्चाशयः ?

शाब्दिकदिशा कियन्ति प्रमाणानि शब्दस्य प्रमाणान्तरत्वे का वाचोयुक्तिरिति सर्वनिपुणतया समुपपादयन्तु ।

(उत्तरम्) व्याकरणशास्त्रस्य शब्दपरामर्शनिष्णाततयाऽभ्यर्हितत्वेऽपि शब्दस्य प्रामाण्यमस्ति न वेति जायमानसंशयस्य शाब्दिकसरणिमनुसृत्य समुच्छेदस्यावश्यकतयाऽऽदावेव नागेशस्तदाशयमादधानोऽमुं ग्रन्थमवतारितवान् ।

अयमाशयः—स्वकीयानुभवप्रयोज्यवास्तववस्तुतत्त्वनिश्चयविशिष्टरागादिप्रयोज्यतदप्रयोज्यान्यथाभाषणरहितपुरुषोपदेशस्यैव शब्दस्वरूपतया शब्दनिष्ठशक्तिज्ञानाधीनोपस्थितिजन्याऽसन्निकृष्टार्थविषयकं यथार्थज्ञानं शाब्दीप्रमा, तत्करणत्वे सति शब्दत्वं शब्दप्रमाणस्य लक्षणम् । प्रत्यक्षादेः शाब्दानुव्यवसायादेश्च तथात्वाभावान्न शब्दप्रमाणत्वम्-इति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शाब्दिकमते प्रत्यक्षानुमानोपमानशब्दाश्चत्वारि प्रमाणानि ।

ननु शब्दस्य प्रमाणान्तरत्वे प्रयोजनविरहः तस्य क्लृप्ते एवानुमानेऽन्तर्भावसत्त्वात्, तथाहि—शाब्दबोधस्थले पदश्रावणे सञ्जाते पदार्थोपस्थितौ च जातायामेते पदार्थाः परस्परनिरूपकभावापन्नविषयतावन्तः (परस्परसंसर्गवन्तो वा) साकाँक्षपदस्मारितत्वात्, दण्डेन गामभ्याजेति वाक्यघटकपदस्मारितपदार्थवदित्यनुमानेनैतानि पदानि स्मारितपदार्थप्रमाजनकानि, अकाँक्षादिविशिष्टपदसमूहत्वाद्-इत्यनुमानेन वा पदार्थसंसर्गबोधस्यानुमित्यात्मकस्य सिद्धेरिति चेन्न, यादृशजलेन सेकः कदापि न जातस्तत्र पयसा सिञ्चतीत्यादियोग्यवाक्यश्रवणानन्तरं क्रमशः पदार्थोपस्थितौ तत्रोपस्थितपदार्थेषु परस्परनिरूपकभावापन्नविषयतावत्त्वस्य परस्परसंसर्गवत्त्वस्य वाऽभावेन हेतोश्च सत्त्वाद् व्यभिचारापत्तेस्तादवस्थ्यात्, पदार्थानां तत्तत्पदस्मारितत्वाभावग्रहदशायामपीष्टस्य शाब्दबोधस्य विरहापत्तेश्च, आकाँक्षादेर्हेतुविधया प्रयोजकत्वासम्भवाच्च ।

अथ च वाक्यार्थबोधस्यानुमितित्वे प्रमापित एव साकाँक्षपदस्मारित्वादिहेतुः कल्पनीयः स्यात्स एव न सम्भवति, "गौरस्ति" इत्यादिवाक्यश्रवणानन्तरम्—अस्तित्वेन गवादिशाब्दस्यैवानुव्यवसायदर्शनात् नत्वनुमितेरपि मनाक् । "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यः" इत्यादिश्रुतिस्थलेऽपि शाब्दत्व एव श्रृणोतेः शक्यतावच्छेदकत्वस्य दर्शनाच्च ।

किञ्च सर्वत्र व्याप्तिज्ञानस्यासम्भवात् शाब्दस्थले च व्याप्तिज्ञानाभावेऽपि बोधस्यानुभवादनुमितौ शाब्दान्तर्भावस्य वक्तुमशक्यत्वात् । सर्वत्र शाब्दस्थले व्याप्तिज्ञानकल्पनाऽऽग्रहे तु-अनुमितिस्थलेऽपि पदज्ञानादिकल्पनाऽऽग्रहं विधाय अनुमितिं शाब्द एव कुतो नान्तर्भावयतीति प्रत्युत्तरजागरणापत्तेः, अतः "गौरस्ती" त्यादिवाक्यश्रवणानन्तरंवृत्तिज्ञानाधीनतत्तत्पदार्थोपस्थितिं विधाय तत्तत्पदार्थसंसर्गविषयकानुव्यवसायसिद्धशाब्दबोधः प्रमातव्यः, तत्र चान्वयव्यतिरेकसिद्धकारणताकतया शब्दस्य करणत्वं विज्ञातव्यमिति दिक् ।

२—(प्र०) तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नम्प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुरिति ग्रन्थस्य काऽऽवश्यकता ? वृत्तिवैशिष्ट्यञ्च कीदृशम् ? तद्व्यावृत्तयश्च काः ? कारणशरीरघटकवृत्तित्वं कीदृशम् ? जातिरूप कुतो नेति सर्वं स्पष्टतया समुपपादयन्तु ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(उ०) शब्दप्रमाणस्य लक्षणं यदि शाब्दप्रमाकरणत्वं तदा सर्वस्याप्यगृहीतशक्तिकपुरुषादेः शब्दश्रवणे सति शाब्दबोधापत्तिरतस्तद्वाराणाय प्रकृतग्रन्थमवतारयति—'तद्धर्मावच्छिन्ने' त्यादिना।

अयमाशयः—"घटोऽस्ती"त्यादिवाक्येभ्यो घटत्वप्रकारकघटविशेष्यकशाब्दबोधे घटपदनिष्ठशक्तिज्ञानाधीनघटत्वप्रकारकोपस्थितेरावश्यकतया घटपदनिष्ठशक्तिज्ञान-घटत्वप्रकारकघटविशेष्यकोपस्थित्योश्च पृथक् पृथक् कारणत्वकल्पने गौरवमतो लाघवाद्विशिष्टस्यैव कारणत्वङ्कल्पनीयम्। तथा चायं कार्य्यकारणभावः सम्पद्यते—समवायसम्बन्धेन तत्सम्बन्धावच्छिन्नतद्धर्मनिष्ठप्रकारतानिरूपिततन्निष्ठविशेष्यताशालिशाब्दबोधम्प्रति तद्धर्मावच्छिन्नतन्निरूपितवृत्तिविशिष्टज्ञानाधीनतद्धर्माच्छिन्नोपस्थितिः समवाय-सम्बन्धेन कारणम्, तादृशवृत्तिवैशिष्ट्यञ्च ज्ञाने स्वविषयकोद्बुद्धसंस्कारसामानाधिकरण्य-स्वाश्रयपदविषयकत्वोभयसम्बन्धेन, तथा च घटत्वावच्छिन्नघटनिरूपितवृत्तिविषयकोद्बुद्धसंस्कारसमानाधिकरणघटत्वावच्छिन्नघटनिरूपितवृत्त्याश्रयपदविषयकज्ञानाधीनघटत्वावच्छिन्नोपस्थितिर्यस्मिन्नात्मनि समवायसम्बन्धेन—समुल्लसति, तत्र समवायसम्बन्धेन समवायसंसर्गताकघटत्वप्रकारताकघटनिष्ठविशेष्यताशालिशाब्दबोधः सम्पद्यते। तथा च न गुडपदात् मधुरत्वप्रकारकगुडपदार्थविशेष्यकशाब्दस्यापत्तिस्तत्र=गुडपदे मधुरत्वावच्छिन्नगुडनिरूपितवृत्त्याश्रयतायाः असत्त्वात्—द्वितीयसम्बन्धविरहेण तादृशवृत्तिविशिष्टज्ञानस्य शाब्दबोधोत्पादकस्यासत्त्वात्। न वा घटप्रकारकघटत्वविशेष्यकशक्तिज्ञानवतो विदुषो घटत्वप्रकारताकघटनिष्ठविशेष्यताकशाब्दबोघस्यापत्तिस्तत्र घटत्वावच्छिन्नघटनिरूपितवृत्तिविशिष्टज्ञानस्य कारणान्तर्गतस्यैवासत्त्वात्। न वा घटपदे घटत्वावच्छिन्नघटनिरूपितवृत्तिज्ञानाभाववतः कदाचिद्-घटपदाद्-घटत्वप्रकारकघटविशेष्यताकशाब्दबोधस्यापत्तिः तत्रापि तादृशवृत्तिविशिष्टज्ञानस्यैव कारणान्तर्गतस्याभावात्, न वा घटपदे विस्मृतघटत्वावच्छिन्नघटनिरूपितवृत्तिकस्य पुंसो घटपदाद्-घटत्वप्रकारेण घटविशेष्यकशाब्दबोधस्तत्र घटत्वावच्छिन्नघटनिरूपितवृत्तिविषयकोद्बुद्धसंस्कारसमानाधिकरणज्ञानस्य विरहात्। न वा समुच्चारितघटपदात् समवायेनोपस्थितस्याकाशस्य शाब्दबोधापत्तिर्घटपदे आकाशत्वावच्छिन्नाकाशनिरूपितवृत्तेरसत्त्वादाकाशनिरूपितवृत्त्याश्रयपदविषयकज्ञानस्य कारणान्तर्गतस्यैवासत्त्वात्। एवं रीत्या जनकत्वादिसम्बन्धेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

घटपदादुस्थितस्य चैत्रादेस्ततः शाब्दबोधापत्तिर्वारणीयेति सर्वं चतुरस्रमिति । वृत्तित्वं तु न जातिः, तद्ग्राहकप्रमाणाभावात् । किन्तु वाच्यत्ववाचकत्वान्यतरत्वाद्यात्मकधर्मविशेष एवेति दिक् ।

३—(प्र०) तार्किकमतसिद्धशक्तिद्वयस्वरूपं विलक्षणताप्रदर्शनपूर्वकं विस्तार्य घटरूपार्थविषयकबोधनिष्ठजन्यतानिरूपितजनकतावत्त्वात्मकवाचकत्वस्य समूहालम्बनबोधमादाय पटेऽपि सत्त्वात् तन्मते घटवाचकत्वं पटे कथं निराक्रियते तन्मतेऽनुगतं वाच्यत्वं वाचकत्वञ्च प्रदर्शनीयम् ॥

(उ०) 'अस्माच्छब्दादयमर्थो बोद्धव्य' इत्याकारा, 'इदम्पदमिमर्थं बोधयत्वि' त्याकारा वेश्वरेच्छा सैव सङ्केतरूपा शक्तिः । तथा चास्मत्पदोत्तरपञ्चम्या अभेदोऽर्थः,शब्दपदोत्तरपञ्चम्या ज्ञानजन्यत्वमर्थः,बुध् धात्वर्थो बोधः,तदुत्तरतव्यप्रत्ययार्थो विषयताश्रयः,प्रथमान्तार्थमुख्यविशेष्यकशाब्दस्यैव तन्मते सिद्धान्तसिद्धतया एतदभिन्नशब्दज्ञानजन्यबोधविषयत्वप्रकारताकभगवदिच्छीयविशेष्यताश्रयाऽभिन्नोऽयमर्थः प्रतीयते । तथा च प्रथमेच्छादिशा पदप्रकारकार्थविशेष्यकशक्तिः पर्य्यवस्यति । द्वितीयेच्छायाः शक्तिरूपत्वे–इदमपदोत्तरद्वितीयाया अभेदोऽर्थः, अर्थपदोत्तरद्वितीयायाश्च विषयत्वमर्थः, बुध्धात्वर्थो बोधः, णिचप्रत्ययार्थो जनकत्वम्, तिप्प्रत्ययार्थो विषयताश्रयत्वम्, प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधदिशैतदभिन्नार्थविषयबोधजनकत्वप्रकारतानिरूपितभगवदिच्छीयविशेष्यताश्रयतावदिदम्पदमित्याकारकार्थप्रकारकपदविशेष्यकशक्तिः पर्य्यवस्यतीत्येव वैलक्षण्यम् । ततश्च—घटपदज्ञानजन्यबोधविषयत्वप्रकारतानिरूपितभगवदिच्छीयविशेष्यतावत्त्वेन घटपदवाच्यताया व्यवहारो घटे घटत्वे समवाये च भवति, यत आश्रयतासम्बन्धेनघटरूपार्थो—घटपदजन्यबोधविषयतावान् भवतु, अवच्छेदकतासम्बन्धेन घटत्वं घटपदजन्यबोधविषयतावान् भवतु, अवच्छेदकताऽवच्छेदकतासम्बन्धेन समवायः घटपदजन्यबोधविषयतावान् भवत्वित्यादिविषयकेच्छायाः कल्पनात् । प्रथमेच्छादिशा घटादिवाचकत्वव्यवहारो घटादिपदे परम्परया समुपपादनीयः ।

द्वितीयेच्छापक्षे च घटादिरूपार्थविषयकबोधजनकत्वप्रकारतानिरूपितभगवदिच्छीयविशेष्यताया घटपदे सत्त्वात्, घटपदे घटघटत्वादिवाचकत्वव्यवहारः साक्षादेव, किन्तु घटाद्यर्थे वाच्यत्वव्यवहारः परम्परयोपपादनीयः, न चेश्वरेच्छायाः सर्वविषयिकायास्तन्मते तस्या लाघवादैक्यस्वीकारात्–"गङ्गापदजन्यबोधविषयत्व-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रकारतानिरूपितभगवदिच्छीयविशेष्यतायास्तीररूपेऽर्थे सत्त्वात् तीररूपार्थविषयकबोधजनकत्वप्रकारतानिरूपितभगवदिच्छीयविशेष्यताया गङ्गापदे सत्त्वात्—तत्र गङ्गापदस्य तीरवाचकत्वापत्तिरिति वाच्यम्, तत्र गङ्गापदजन्यो बोधो भवतु, बोधश्च तीरविषयको भवत्वित्याकारिकाया एव खण्डश इच्छायाः स्वीकाराद् गङ्गापदजन्यतावद्बोधनिरूपितत्वविषयतात्वोभयधर्मावच्छिन्नप्रकारतानिरूपितभगवदिच्छीयविशेष्यतायास्तीररूपेऽर्थेऽसत्त्वान्न गङ्गापदस्य तीरादिवाचकत्वापत्तिर्न वा लक्षणोच्छेदापत्तिः । आधुनिकनासङ्केतस्थलेऽपि—'द्वादशेऽहनि पिता नाम कुर्यादि' त्यादिनेश्वरेच्छाया मन्तव्यत्वादधिकन्त्वन्यत्रानुसन्धेयमिति । तन्मते वाचकत्वम् — अर्थविशिष्टत्वम्, वैशिष्ट्यञ्च—स्वविषयकबोधजनकतात्वेतरधर्मानवच्छिन्नस्वविषयकबोधजनकतात्वावच्छिन्नप्रकारतानिरूपितभगवदिच्छीयविशेष्यतावत्त्वसम्बन्धेन, वाच्यत्वञ्च—पदविशिष्टत्वम्, वैशिष्ट्यञ्च-स्वज्ञानजन्यबोधनिरूपितत्वविषयतात्वोभयधर्मेतरधर्मानवच्छिन्नतादृशोभयधर्मावच्छिन्नप्रकारतानिरूपितभगवदिच्छीयविशेष्यतावत्त्वसम्बन्धेन । तथा च न घटवाचकत्वम्पटपदस्य तत्र घटरूपार्थवैशिष्ट्याभावादिति संक्षेपः ।

४—(प्र०) तार्किकमतसिद्धां शक्तिं व्युदस्य शाब्दिकमतसिद्धशक्तिस्वरूपं सिद्धान्तितं प्रतिपादयन्तु ॥

(उ०) तार्किकास्तावदस्माच्छब्दादयमर्थो बोद्धव्य, इदम्पदमुमर्थम्बोधयत्वित्युभयविधेच्छामादाय क्रमशः पदपदार्थप्रकारकपदार्थपदविशेष्यकशक्तिमेव सङ्केतस्वरूपामुद्घोषयन्ति, किन्तु तदविचारितरमणीयमेव प्रतिभाति, यत इच्छायाः समवायेनेश्वरे एव सत्त्वात् पदपदार्थयोस्तादृशशक्तेरेव दौलभ्यात् । विलक्षणविषयतासम्बन्धेन तादृशेच्छावत्त्वात्मकशक्तेः पदे पदार्थे च सत्त्वेऽपि तादृशविलक्षणविषयतायाःपरम्परात्मिकायाः शक्तिनियामकत्वे मानाभावात्, साक्षादिच्छायाः पदे पदार्थे वाऽसम्भवात् । किञ्च सम्बन्धस्य प्रतियोग्यनुयोगिभिन्नत्वे द्विष्ठत्वे च सत्याश्रयतया विशिष्टबुद्धिनियामकत्वेनैव सम्बन्धत्वमिष्टम् । प्रकृतेऽयं शब्दोऽयं पदार्थो वा तादृशेच्छावानित्यादिविशिष्टप्रतीतेरदर्शनाद् घटवद्भूतलमित्यादिस्थलीयसंयोगादेरिव सम्बन्धत्वासम्भवात् तत्र शक्तिस्वरूपताकल्पनं हास्यास्पदमेव ।

एतेन बोधजनकत्वादेरपि शक्तित्वं निरस्तमेवेति वेदितव्यम् । तथा च वाच्यवाचकभावापरपर्यायात्मिका शब्दार्थनिष्ठान्योन्याध्यासप्रयोज्यतादात्म्यसम्बन्धग्राह्यैव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शक्तिरङ्गीकरणीया। शब्दार्थयोरितरेतराध्यासमूलकतादात्म्यसम्बन्धस्तु "ओमित्येकाक्षरं ब्रह्म,, 'रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिन, इत्यादिस्मृतिवाक्यात्स्पष्टमेवोपलभ्यत इति दिक्।

५—(प्र०) शब्दार्थयोस्तादात्म्यं वैयाकरणैः कथमभ्युपेयते कथं वा प्रसिध्यति, तादात्म्यस्वीकारे पतन्तस्तार्किकदोषाः कथं वा समुद्धरणीयाः ? कथं वा शक्यशक्तत्वव्यवहारः समुपपादनीयः॥

(उ०) अयमाशयः—शब्दस्य प्रश्नेऽर्थस्य वा प्रश्ने गौरीत्येकस्यैवोत्तरस्य, संज्ञासंज्ञिनोरभेदस्य च दर्शनादवश्यमुभयोरितरेतराध्यासमूलकप्रातिभासिकमस्तितादाम्यमित्यङ्गीकार्यमन्यथाऽर्थं वदति, अर्थं शृणोतीत्यादिव्यवहार एव विलीयेत, 'ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् यः प्रयाति त्यजन्देहं स याति परमाङ्गतिम्॥' "रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः। शौर्यभङ्गो रावणस्य मदभङ्गश्च बालिनः' इत्यादिस्मृतिपुराणादिवचनाच्च स्पष्टमेव तादात्म्यं शब्दार्थयोः प्रतीयतेऽन्यथा शब्दस्वरूपात्मकनाम्नि तादृशशक्तिवर्णनस्यैवालीकत्वापत्तेः।

तादात्म्यञ्च—तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वात्मकम्, तस्य सम्बन्धत्वं तु 'सुन्दरो देवदत्त' इत्यादिप्रतीतिस्थले स्पष्टमेव।

ननु शब्दार्थयोरन्योन्यं तादात्म्यमेव यदि सिद्धान्तसिद्धं तदा मधुरशब्दस्य मुखावच्छेदेन समुच्चारणेऽवच्छेदकतासम्बन्धेन मुखे मधुरशब्दस्य विद्यमानत्वे तत्तादात्म्यापन्नस्य मधुरपदार्थमोदकादेरपि विद्यमानतया मुखे माधुर्यापत्तिः, एवं वह्निशब्दे समुच्चारिते तत्तादात्म्यापन्नस्य वह्निशब्दार्थतेजोविशेषस्यापि सत्त्वान्मुखे ज्वालापत्तिः प्रसज्येतेति चेन्न। भेदसहिष्णवभेदस्यैव स्वीकारात् तत्र च भेदस्य व्यावहारिकतया (पारमार्थिकतया) अभेदस्य च प्रातिभासिकतया एकत्र समावेशसम्भवेन व्यावहारिकदिशा (पारमार्थिकदिशा) तथाऽऽपादयितुमशक्यत्वात्।

वस्तुतस्तु—प्रातिभासिकाभेदपारमार्थिकाभेदाभ्युपगमे तार्किका एव विजयेरन्नित्यतः शाब्दिकसिद्धान्तमनुरुध्य पारमार्थिकाभेद एव तादात्म्यबोध्यो विज्ञातव्यः।

न च—पारमार्थिकाभेदाभ्युपगमे माधुर्यज्वालादिप्रसङ्गः केवलसमुच्चरितमधुरवह्निशब्दाभ्यां दुर्वार एवेति वाच्यम्, माधुर्य्यादिप्रसक्तिम्प्रति संयोगेनैव मधुरपदार्थादेः कारणतया—प्रकृते कारणताघटकसम्बन्धेन तयोरभावात्तथा वक्तुम-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शक्यत्वात् । कारणताघटकसम्बन्धातिरिक्तसम्बन्धेन कार्य्योत्पत्त्यापत्तिप्रसञ्जने तु तार्किकमतेऽपि कालिकेन सता मधुरादिना मुखे माधुर्याद्यनुभवापत्तेर्दुर्वारतापत्तेः ।

न च तथापि घटपदार्थस्य चाक्षुषप्रत्यक्षविषयत्वे तत्तादाम्यापन्नस्य घटशब्दस्यापि चाक्षुषविषयत्वापत्तिरिति वाच्यम् . यथा घटस्य गन्धवत्त्वेऽपि घटत्वेनैव चाक्षुषत्वं न तु गन्धवत्त्वादिना तथैव शब्दार्थयोस्तादाम्येऽपि घटत्वेनैव चाक्षुषत्वं न नु घटशब्दत्वेनापीति समाधानसम्भवात् । न चैवमपि 'घटपदार्थं श्रृणोमि" घटशब्दं पश्यामीत्याद्याकारकानुव्यवसायः समापतेदिति वाच्यम्, येन रूपेण विषयस्य व्यवसायविषयता तेनैव रूपेण नुव्यवसनोयतया घटशब्दत्वेन घटचाक्षुषाभाषाभ वे तेन रूपेण तदनुव्यवसायस्यैवासम्भवात् । अधिकमन्यत्रेति मैथिलाः ॥

६—(प्र०) वस्तुत इत्यादिना कीदृशं शब्दार्थयोस्तादात्म्यं सयुक्तिकं ग्रन्थ कृता प्रतिपादितमिति सम्यक् प्रदर्श्य शक्तिः साध्वसाधुशब्दसाधारणी न वेति तार्किकमतनिरसनपूर्वकं विवेचयन्तु ॥

(उ०) केवलशब्दार्थयोस्तादात्म्यस्वीकारे बहुदोषान् समाधातव्यान् परामृश्य बुद्धिविषयार्थेन (बौद्धात्मकेन) सह स्फोटात्मकशब्दस्य तादात्म्यमङ्गीकृतम् ।

तादृशबौद्धार्थेन वह्न्यादिशब्दस्य तादात्म्येऽपि बौद्धार्थस्याङ्गारादेर्दाहादिजनशक्तिविरहान्न मुखे उच्चारितकेवलवह्निशब्देन दाहप्रसञ्जनशङ्काऽपि, तादृशार्थश्च शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति विकल्पसूत्रेण स्पष्टमेव विज्ञायते ।

अत एव च शशश्रृङ्गादिशब्दस्य बाह्यार्थराहित्येऽपि बुद्धिविषयीकृतबौद्धार्थमादायार्थवत्त्वेन प्रातिपदिकसंज्ञादिकार्यं सञ्जायते ।

तार्किकास्तु—श्रृङ्गे शशीयत्वभ्रमं विधाय भ्रान्तार्थमादाय प्रातिपदिकसंज्ञादिकार्य्यं निर्वाहयन्तो दृश्यन्ते, ते शशशब्दवाच्यजन्तुविशेषस्य विशेषदर्शनकाले विशेषदर्शनरूपबाधकेन भ्रमस्य बाधिततया भ्रान्तार्थासम्भवात् तदानीं शशश्रृङ्गं नास्तीति वाक्यघटकशशश्रृङ्गशब्दे प्रातिपदिकसंज्ञादिसमाधानरहिताः समुपेक्षणोया एवेति ।

यद्यपि तार्किकाः "ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः । अम्बाम्बेति यदा बालः शिक्षमाणः प्रभाषते ॥ अव्यक्तं तद्विदां तेन व्यक्ते भवति निश्चयः;

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इति हरिकारिकाऽभिप्रायं साधुशब्दस्मरणानुमित्यन्यतरपूर्वकाऽपभ्रंशशब्दाधीन-शाब्दबोधो भवतीत्यात्मकमनुरुध्य साधुशब्दस्मरणद्वारा साधुशब्दनिष्ठायाः शक्तेर-पभ्रंशशब्देऽयथार्थज्ञानद्वारावाभ्रंशशब्देभ्यः शाब्दबोधं समुत्पाद्य च वास्तवी शक्तिः साधुशब्देष्वास्तीति स्वाभिप्रायं विशदयन्ति; किन्तु तन्न विचारसहम्, वैषम्ये बीजाभावात्, शक्तिग्राहकशिरोमणि व्यवहारस्योभयत्र तुल्यत्वात्। तथा च यथा घटादिसाधुशब्देनार्थप्रतीतिपूर्वकंदृश्यमानोव्यवहारस्तथैवापभ्रंशगगर्यादि-शब्देभ्योऽपि साक्षादर्थप्रतीतिपूर्वकंव्यवहारः प्रचलितोऽस्तीति मानसे निर्धारणीयम्।

साधुशब्दस्मरणद्वाराऽर्थप्रतीतिस्तत्पूर्वको व्यवहार इति तु केवलभाषणसाह-सम्, यतः साधुशब्दानुभवविकलानामपि बालकहालिकादीनामपभ्रंशशब्देभ्यः साक्षादेव अर्थप्रतीतिपूर्वकव्यवहाराणाम्प्रत्यक्षदर्शनात्, नापि तेषां साधुशब्द-निष्ठशक्तीनामपभ्रंशे भ्रान्त्या सञ्जातया अर्थप्रतीतिपूर्वकव्यवहार इति कल्पना ज्यायसी, निःसन्देहप्रत्ययस्य बाधकं विना भ्रउत्वायोगादुत्तरकालेऽर्थज्ञानस्या-बाध्यमानत्वाच्च तादृशकल्पनाया एवाऽऽसम्भवात्।

अत एव हालिकबालकादीनुद्दिश्य किमपि वस्त्वानेतुं साधुशब्दप्रयोगे क्षटित्ये-वार्थसंशयस्य भावावबोधविरहस्य वा जायमानत्वेऽप्यनन्तरमपभ्रंशशब्दप्रयोगे अर्थं संशयो भाववबोधविरहो वा विद्यमानो निवर्त्तत इति।

एतादृशम्भावमासाद्यैव नीतप्रणतिकुसुकाञ्जलिः पतञ्जलिरपि स्वभाष्ये "समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियम इति प्रभृतिवाक्यं विशदयामास।

"वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोरि"ति कारिकांशेन शाब्दिक-शिरोमणि भृर्तृहरिरपि तादृशमेव भावमुद्बोधयामास।

अत एवायंम्लेच्छाधिकरणं मीमांसावर्ति सङ्गच्छते, तत्र हि यवशब्दस्यायंवर्य्यं दीर्घशूके प्रयुज्यमानत्वात् म्लेच्छैश्च प्रियङ्गौ प्रयुज्यमानत्वात् प्रयोगसंख्यायाश्चोभ-यत्र तुल्यतया वेदे क्व शक्तिमाकलय्य प्रयुक्त इति जागरूकचिकित्सायाम् आर्य्य-प्रयोगप्रसिद्धि बलवतीं श्रेयसीञ्च निर्धार्य्य दीर्घशूके शक्तिमाकलय्यैव यवशब्दः प्रयुक्त इति जायते तत्र सिद्धान्तः।

अन्यथा प्रियङ्गौ म्लेच्छादीनां शक्तिभ्रमादर्थबोधे भ्रान्तशक्तिकव्यवहारप्रसिद्धेः पुरोवर्तिशुक्तिशकले—"इदं रजतमि"ति ज्ञानस्येव यस्त्वसाधकतया आर्य्यम्लेच्छ-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्यवहारप्रसिद्धयोर्बलवत्त्वपरामर्शस्यैवासङ्गत्यापत्तेरतः शक्तिस्साध्वसाधूभय-शब्दसाधारण्येवा स्तीति निर्धारणीयम्, किन्तु कस्य शब्दस्य प्रयोगे धर्मं इति जिज्ञासायां न शक्तिमतः शब्दस्य प्रयोगे धर्मो निर्धारणीयः, किन्तु व्याकरण-व्यड्याथंविशिष्टशब्दनिष्ठपुण्यजनकतावच्छेदकजातिविशेषात्मकसाधुत्वविशिष्टस्य प्रयोगादेवेति संक्षेपः ।

५— (प्र०) शब्दः कतिविधः सलक्षणं तद्भेदान् प्रदर्श्य नानार्थक-शब्देषु अर्थतात्पर्य्यसन्देहे केन प्रकारेणैकतरार्थनिर्णय इति सप्रमाणं सोदाहरणं प्रकाशयन्तु ॥

(उ०) रूढि-योग—योगरूढि—स्वरूपशक्तेस्त्रैविध्ये सब्दानामपि चातुर्विध्यं प्रति फलति—रूढ—यौगिक योगरूढ—यौगिकरूढभेदात् । तत्र रूढत्वं नाम शास्त्री-यावयवशक्तिनिरपेक्षसमुदायशक्तिप्रयोज्यार्थबोधकत्वं, यथा—मणिनूपुरादिशब्देषु, तत्र मण्यते यः स मणिरिति शास्त्रीयव्युत्पत्तावपि शास्त्रीयावयवार्थशक्तिनैरपेक्ष्येणैव मणिशब्दस्य समुदायशक्त्या मणित्वजातिविशेषावच्छिन्नबोधकत्वम् । एवं नूपुर-शब्देऽपि—नुवति पुरमिति शास्त्रोयविग्रहेऽपि शास्त्रीयावयवार्थशक्तिनिरपेक्षापुरः सरमेव नूपुरशब्दस्य समुदायशक्त्या नूपुरत्वजातिविशेषावच्छिन्नचरणभूषणबोध-कत्वम्, एवं गोमण्डलादिशब्देष्वपि समूहनीयम् ।

शास्त्रकल्पिदायवार्थंनिरूपितशक्तिमात्राधीनार्थबोधकत्वं यौगिकत्वम् । यथा पाचकादिपदे, तत्र हि—पच्—ण्वुल्—रूपावयवार्थपाकाश्रयरूप—तत्तदर्थनिरूपिता-वयवशक्तिमात्राधीनपाककर्तृबोधकत्वात् ।

शास्त्रकल्पितावयवार्थसहकृतसमुदायविशेषार्थनिरूपितशक्त्यधीनार्थबोधकत्वं योगरूढत्वम्, यथा पङ्कजादिपदे, तत्र हि-पङ्काज्जायते यत्तत्पङ्कजमिति व्युत्पत्त्या निष्पन्नपङ्कजशब्दस्य पङ्कजनिकर्तृरूपावयवार्थसहकृतपद्मत्वावच्छिन्नात्मकसमुदाय-विशेषार्थनिरूपितशक्त्यैव पङ्कजनिकर्तृताविशिष्टपद्मत्वावच्छिन्नबोधकत्वात् ।

न च केवलावयवशक्त्यधीनपङ्कजनिकर्तृबोधानन्तरं लक्षणयैव पद्मरूपविशेषा-र्थस्य बोधसम्भवात् कथं तत्रावयवार्थसहकृतसमुदायविशेषार्थनिरूपितशक्त्यधीन-विलक्षणपद्मबोधः समुन्नीयत इति वाच्यम्, लक्षणाबीजस्य तात्पर्य्यानुपपत्तेः सम्बन्धानुपपत्तेर्वाऽभावात्——लक्षणाधीनपद्मार्थबोधनस्याशक्यत्वात् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यौगिकरूढत्वम्—अवयवार्थ-अवयवार्थनिरपेक्षसमुदायविशेषार्थान्यतरार्थनिरूपितशक्त्यधीनार्थबोधकत्वं यथाऽश्वगन्धमण्डपोद्भिदादिपदेषु, तत्र हि—अश्वगन्धशब्दस्य क्वचन समुदायविशेषार्थौषधिविशेषनिरूपितशक्त्यधीनौषधिबोधकत्वात्, क्व चन चाऽश्वगन्धसदृशगन्धवदात्मकावयवार्थनिरूपितशक्त्यधीनवाजिशालाबाधकत्वात्। एवं क्वचन मण्डपपदस्य समुदायगृहविशेषार्थनिरूपितशक्त्या गृहविशेषबोधकत्वात्, क्व चन चावयवार्थनिरूपितशक्त्या मण्डपानकर्तृबोधकत्वात्। एवम् क्व चन—उद्भित्पदस्य समुदाययोगविशेषार्थनिरूपितशक्त्या यागविशेषबोधकत्वात्, क्व चन चाऽवयवार्थनिरूपितशक्त्योद्भेदनकर्तृतरुलतादिबोधकत्वात्। यत्र च पङ्कजादिपदेन तात्पर्यग्रहाधीनकेवलयोगार्थस्य केवलसमुदायार्थमात्रस्य वा बाधोऽमीप्सितः 'भूमौ पङ्कजमुत्पन्नं कल्हारकैरवमुखेष्वपि पङ्कजेष्वि'त्यादौ, तत्र लक्षणयाऽप्रसिद्धशक्त्या वाऽभीप्सितार्थो विज्ञातव्यः। यौगिकरूढशब्दस्य यौगिकरूढयोरन्तर्भावं विधाय यद्यपि त्रैविध्यमेव शब्दस्येच्छन्ति वैयाकरणस्तथापि स्पष्टप्रतिपत्तयेऽतिरिक्ततया सोऽभिहित इति।

नानाशक्तिप्रयोज्यनाबाधर्मावच्छिन्नार्थबोधकनार्थकशब्दे समुच्चारिते स्वनिष्ठतावच्छक्त्या तावदर्थानामुपस्थितौ प्रकृते कस्यार्थस्य बोधे तात्पर्यमिति सन्देहे संयोगविप्रयोगादयः समुपस्थाय तत्तदर्थतात्पर्यं परिच्छिन्दन्ति। तदुक्तं शाब्दिकावतंसभर्तृहरिणा—

> संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
> अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥
> सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
> शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥ इति

(संयोगविप्रयोगौ)

सवत्साधेनुरित्यत्र धेनुशब्दस्य धानकर्मताविशिष्टे (१) शक्ततया प्रकृते

---

(१) धानकर्मता खलु दुग्धपानकर्मता, दुग्धपानञ्च-दुग्धप्रतियोगिकविभाजनकत्वे सति दुग्धप्रतियोगिकगलाधःसंयोगानुकूलो यो व्यापारस्तद्रूपम्, तच्च वत्सादिनिष्ठम्, तादृशदुग्धपानकर्मता च दुग्धप्रतियोगिकविभागानुयोगिता तदाश्रयत्वम्—गवादेरिति॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कस्य बोधक इति जिज्ञासायां समभिव्याहृतवत्सपदार्थसंयोगो दुग्धपानकर्मताविशिष्टगवीतात्पर्यमेव परिच्छिन्नत्ति, अतः सवत्साधेनुरित्यत्र धेनुपदेन विलक्षणगव्या एव बोधो भवति। एवम् अवत्साधेनुरित्यत्रापि धेनुपदस्य क्व तात्पर्य्यमिति सन्देहे समभिव्याहृतवत्सपदार्थस्य प्रायेण तत् संयोगापन्नस्य सम्प्रति वियोगेऽपि, तद्-वियोगो धेनुपदेन गोरूपार्थबोधनतात्पर्य्यमेव निर्णाययति। यद्वा गोनामप्रकरणे धेनुशब्दपाठाद् गोषु लोके प्रयोगाच्च धेनुशब्दो गोशब्दस्य प्रत्यायक इति तु निश्चितमेव, किन्तु 'वत्सः पुत्रादिवर्षयोः' इति मेदिनीकोशेन "वत्सौ तर्णकवर्षौ द्वौ" इत्यमरकोशेन च वत्सशब्दस्य नानार्थकत्वनिश्चयात् प्रकृते क्व तात्पर्य्यमिति जिज्ञासायां विलक्षणगोसंयोगवियोगाभ्यां गोपुत्र एव वत्सतात्पर्य्यमिति ज्ञायत इत्यपि वक्तुं शक्यते।

यदि च विशेषबोधकपदार्थसंयोगवियोगाभ्यामेव समभिव्याहृतपदतात्पर्य्यं-विषयीभूतार्थनिश्चयः, प्रकृते उभयोरेव नानार्थकत्वात् कथं केन तत्तदर्थतात्पर्य्यं-परिच्छेदसम्भव इत्याग्रहे तु 'सशङ्खचक्रो हरिः' 'अशंखचक्रो हरि'रित्यत्र शङ्खचक्रसमभिव्याहृतपदार्थ–संयोगवियोगाभ्यां नानार्थहरिशब्दस्य विष्णुरूपार्थे तात्पर्य्यंपरिच्छेद इति विज्ञातव्यम्।

(साहचर्यम्)

"रामलक्ष्मणौ" "भीमार्जुनौ" इत्युभयत्र रामार्जुनशब्दयोः नानार्थकतया रामशब्देन दाशरथिरामस्य बोधस्तात्पर्यविषयः किं वा परशुरामादेर्बोधस्तात्पर्य-विषय इति विचिकित्सायां लक्ष्मणसाहचर्याद्रामशब्देन दाशरथिरामबोधता-त्पर्य्यस्यैव परिच्छेदो भवति। एवमर्जुनशब्देन कार्तवीर्य्यपाण्डवपार्थयोरुभयो-रूपस्थितौ कस्य बोधे प्रकृतार्जुनशब्दस्य तात्पर्य्यमिति संशयो भीमसाहचर्यं पार्थरूपार्थ एव बोधतात्पर्य्यं परिच्छिनत्ति।

(विरोधः)

'रामार्जुनौ' "कर्णार्जुनौ" इत्यादौ रामकर्णशब्दयोर्नानार्थकतया प्रकृते किमर्थविषयकबोधे तत्तात्पर्य्यमिति संशये भार्गवकार्तवीर्ययोः सूतपुत्रार्जुनयोः परस्परं विरोधस्य शास्त्रतो निश्चितत्वाद्–विरोध एव तत्र रामशब्दस्य परशुरामबोध-तात्पर्य्यम्, अर्जुनशब्दस्य कार्तवीर्यबोधतात्पर्यम्, कर्णशब्दस्य च सूतपुत्रबोध-तात्पर्य्यं परिच्छिनत्तीति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(अर्थः)

'अञ्जलिना जुहोति' 'अञ्जलिना सूर्यमुपतिष्ठते' इत्यत्र क्व कीदृशार्थबोधको ऽञ्जलिशब्द इति जिज्ञासायाम्—अर्थशब्दाभिधेयप्रयोजनतात्पर्याभ्याम्-अञ्जलिना जुहोतीत्यत्राञ्जलिशब्दस्य हवनीयद्रव्यविशिष्टमध्यमाऽनामिकाङ्गुष्ठसंयोगाकार-बोधकत्वम् । अञ्जलिनाऽऽदित्यमुपतिष्ठते इत्यत्र च करद्वयसंयुक्ताकारपरत्वमिति विज्ञायते ।

एवं 'स्थाणुं वन्दे' इत्यत्र स्थाणुशब्दस्य शिव–शाखादिहीनतर्वादिबोधकतया प्रकृते कस्तावद् वन्दनीय इति जिज्ञायां वन्दे इति पदप्रयोगतात्पर्य्यात् स्थाणुशब्दस्य प्रकृते शिवबोधकत्वमेवेति निश्चीयते ।

(प्रकरणम्)

सैन्धवपदस्य देवपदस्य नानार्थकतया "सैन्धवमानय" "सर्वं जानाति देव" इत्यादिस्थले सैन्धव–देवादिशब्देन कस्य कस्य बोधोऽभिप्रेत इति जिज्ञासायां प्रकरणमुपस्थाय भोजनवेलायां सैन्धवपदस्य लवणबोधतात्पर्य्यं परिच्छिन्नति यात्रावेलायाञ्चाश्वबोधतात्पर्य्यं परिच्छिन्नति, एवं 'सर्वं जानाति देव इति स्थले परस्परभाषणप्रकरणाद्–देवशब्दस्य भवदर्थकत्वनिश्चयः ।

(लिङ्गम्)

लिङ्गन्तावत्–सम्भाव्यमानधर्मविशेषस्तेन "अक्ताः शर्करा उपदधाति" इत्यादौ "तेजो वै घृतमि"तिस्तुतिरूपाद्धर्मविशेषाद्—अक्ताशब्दस्यघृतसाधकाञ्जनपरत्वं न तुजलसाधकाञ्जनपरत्वम् ।

एवं 'कुपितो मकरध्वजः' इत्यत्र प्राणिधर्मकोपविशेषात् नानार्थकमरध्वज-शब्दे कामदेवबोधकत्व एवतात्पर्य्यग्रह इति ।

(शब्दस्यान्यस्य सन्निधिः)

अन्यस्य सन्दिग्धार्थकभिन्नस्य शब्दस्याव्यवधानेनोपस्थितौ सत्यां विशेषार्थ-निश्चयो नानार्थकशब्दस्य भवति, यथा "रामो जामदग्न्यः" इत्यत्र जामदग्न्य-शब्दसान्निध्याद् रामशब्दस्य परशुरामबोधे एव तात्पर्यमिति निश्चयः ।

एवं 'देवः पुरारिरि'त्यत्र पुरारिशब्देन त्रिपुरासुरहन्तुः शिवस्य बोधोऽभिप्रेतः किं वा शत्रुपुरनाशकस्य कस्य चिद् बोधोऽभिप्रेत इति तात्पर्य्यसंशये सन्दिग्धार्थकभ-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्रिसमानविभक्त्यन्तदेव शब्दसान्निध्यात्पुरारिशब्देन शिवस्यैव बोधोऽभिप्रेत निश्चीयते ।

(सामर्थ्यम्)

'अभिरूपाय कन्या देये'त्यत्र कीदृशसुन्दरस्याभिरूपपदेन बोधोऽभिप्रेत इति संशये सामर्थ्यादतिशयसुन्दरस्यैव बोधे तात्पर्य्यमिति परिच्छिद्यते ।

'मधुना मत्तः पिकः इत्यत्र मधुशब्देन मद्यस्य बोधोऽभिप्रेतः, किं वा वसन्तस्य बोधोऽभिप्रेत इति विचिकित्सायां मादनसामर्थ्यात् वसन्तबोधतात्पर्य्यमेव निश्चीयते ।

(औचिती)

यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा ।
यश्चैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः ॥

इत्यत्रौचित्यात् परशुनेत्यस्य छेदनार्थत्वम् ।

मधुसर्पिषेत्यस्य सेचनार्थत्वं गन्धमाल्याद्यैरित्यस्य पूजनार्थत्वं प्रतीयते ।

एवं 'यातु वो दयितामुखमि'त्यत्र दयिता (प्रिया) वः (युष्माकम्) मुखम् (आननम्) प्रविशतु इत्यर्थः, किं वा दयिता मानमपहाय युष्माकं मुखम् = साम्मुख्यं प्राप्नोतु इति वाऽर्थो यतो मुखशब्दस्याननसाम्मुख्योभयार्थप्रतिपादकत्वादिति सन्देहे औचित्यात् (दयितायाः–साम्मुख्यप्राप्तेरेव योग्यत्वात्) मुखशब्दस्य साम्मुख्यार्थबोधन एव तात्पर्य्यमिति निश्चीयते ।

(देशः)

'भात्यत्र परमेश्वर' इत्यत्र परमेश्वरशब्देन विष्ण्वादेर्बोधोऽभीष्टः, किं वा 'राज्ञ' इति सन्देहे ऽत्रेत्यनेसोपस्थापितसमभिव्याहृतपदार्थाश्रयस्थानराजधानीविशेषात् राज्ञ एव बोधोऽभिप्रेत इति निश्चीयते ।

एवं 'विभाति गगने चन्द्रः' इत्यत्र 'कर्पूरः चन्द्रसंज्ञक' इत्यमरकोशादेः चन्द्रशब्दस्य चन्द्रकर्पूरोभयवाचकत्वनिश्चयात् प्रकृते चन्द्रशब्दस्य कर्पूरवाचकत्वं शशिवाचकत्वं वेति सन्देहे समभिव्याहृतपदार्थाश्रयीभूतगगनस्थानात् शशी एव चन्द्रबोध्योऽत्रेति निश्चीयते ।

(कालः)

समभिव्याहृतपदार्थाश्रयीश्रयीभूतकालेन रात्र्यात्मकेन ।'निशि चित्रानुर्भाति'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इत्यत्र चित्रभानुपदेन वह्नेर्बोधः, दिनात्मककेन तादृशकालेन च सूर्यस्य बोधो निधार्यते ।

(व्यक्तिः)

व्यक्तिः स्त्रीत्वपुंस्त्वनपुंसकत्वाद्यन्यतमरूपशब्दस्वभावोपस्थितिस्तया 'मित्री भाति' 'मित्रं भाती' त्यादौ क्रमशः सूर्य्यसुहृदोर्भानमिति मित्रशब्देन निश्चीयत इति ।

(स्वरादयः)

उदात्ताद्यन्यतमस्वरेणेत्यर्थः । यथा स्थूलपृषतीमित्यादौ पूर्वपदप्रकृतिस्वरात्-स्थूलानि पृषन्ति यस्यां सेति विग्रहनिष्पन्नबहुव्रीहिशब्द इत्यध्यवसायः । समासान्तोदात्तस्वरेण च स्थूला चासौ पृषतीति विग्रहनिष्पन्नसमानाधिकरणतत्पुरुषशब्द इति निश्चीयत इति दिक् ।

८—(प्र०) लक्षणायाः स्वरूपं सोदाहरणं तद्बीजं तद्भेदांश्चोपपाद्यग्रन्थकारोक्तियुक्तिभिस्तस्या अनावश्यकत्वं स्फुटीक्रियताम् ।।

(उ०) गङ्गायां घोष इत्यादिस्थले घोषपदवाच्ये गङ्गानिरूपिताधेयताया असम्भवाद्घोषपदस्य मकरादिषु लक्षणायां तात्पर्य्यानुपपत्तितो गङ्गापदस्य स्वशक्यभगीरथरथखाताविच्छिन्नजलप्रवाहसामीप्यसम्बन्धानुयोगिनि तीरे लक्षणायां सञ्जातायां तीर निरूपिताधेयताविशिष्टघोषविषयकबोधस्ततः सम्पद्यते । लक्षणाप्रयोजनं तु गङ्गागतविलक्षणशैत्यपावनत्वादिप्रतितीरेव । लक्षणात्वं तथा च स्वशक्यसम्बन्धत्वात्मकम्फलितम् । यद्यपि 'यजमानः प्रस्तर' इत्यादिस्थले ऽन्वयानुपपत्तित एव लक्षणा सञ्जायते तथापि प्रकृते तात्पर्य्यानुपपत्तित एव लक्षणेति निर्धारणीयमन्यथा विनिगमनाभावाद् घोषपदस्यैवमकरादिषु लक्षणापत्तेः ।

तादृशलक्षणा च पदशक्यनिरूपितासादृश्यानुयोगित्वसम्बधेन स्वशक्यसम्बन्ध्यर्थप्रतिपादकत्वेन, अथ च पदशक्यनिरूपितसामीप्यादिसम्बन्धानुयोगितया स्वशक्मसम्बन्ध्यर्थप्रतिपादकत्वेन द्विविधेति गीयते । तत्राद्या शुद्धा द्वितीया गौणी । प्रथमोदाहरणन्तु--'सिंहो माणवक' इत्येव, तत्र सिंहपदशक्यकेसरिसादृश्यनुयोगित्वं माणवके विज्ञाय सिंहपदस्य तत्र लक्षणा विधीयते । द्वितीयोदाहरणन्तु-- 'गङ्गायां घोष' इत्यादि, तत्र गङ्गापदशक्यार्थभगीरथखाताविछिन्नजलप्रवाहसामीप्यानु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

योगित्वं तीरे विज्ञाय तत्र गङ्गापदस्य लक्षणां विधत्ते, सैव च स्वशक्यसम्बन्धात्मिका लक्षणा स्वार्थसंवलितपरार्थाभिधायित्वेन स्वार्थपरित्यागपुरः सरेतरार्थाभिधायित्वेन च अजहत्स्वार्था जहत्स्वार्थाशब्दाभ्यां गीयते, यथा "छत्रिणोयान्ति" "कुन्तान् -प्रवेशय" यष्टीः प्रवेशय" काकेभ्योदधि रक्ष्यतामित्यादौ क्रमशः छत्र--कुन्त--यष्टि--काक--शब्देभ्योऽजहत्स्वार्थसंज्ञकलक्षणया क्षत्रिसहितसेना--कुन्तास्त्रसंयुक्तपुरुष--यष्टिसंयुक्तपुरुष-- काकसंवलितसर्वदध्युपधातकानां बोधात्ततत्रत्यलक्षणाऽजहत्स्वार्थात्मिकेति निर्धार्यते।

जहत्स्वार्थाया उदाहरणम्--"गङ्गायां घोष' इत्याद्येव, तत्र हि गङ्गापदलक्ष्यार्थतीरान्वयिना घोषेण साक्षाद् गङ्गापदशक्यार्थस्यान्वयबोधासम्भवात्--केवलतीर एव गङ्गापदलक्षणाया निश्चेतव्यत्वात्।

एवं 'मञ्चा हसन्ती'त्यत्र मञ्चपदलक्ष्यार्थमञ्चस्थपुरुषान्वयिहसनक्रियया एव साक्षान्-मञ्चपदशक्यार्थस्य पल्यङ्कविशेषस्यान्वयबोधासम्भवात् तत्र शुद्धमञ्चस्थपुरुष एव लक्षणेति परामर्शः।

तथा च तात्स्थ्यताद्धर्म्यतत्सामीप्यतत्साहचर्य्यादिसम्बन्धान् लक्षणात्मकान् विज्ञायेयं कारिका ग्रन्थेऽवतारिता—

तात्स्यात्तथैव ताद्धर्म्यात्तत्सामीप्यात्तथैव च।
तत्साहचर्यात्तादर्थ्याज्ज्ञेया वै लक्षणा बुधैः॥ इति।

उदाहरणानि तु क्रमशः "मञ्चा हसन्ति" "सिंहो माणवकः" "गङ्गायां घोषः" यष्टीः प्रवेशय "स्थूणा इन्द्र" इत्यादीनि विज्ञास्यन्ते। स्वशक्यसम्बन्धस्य परम्परात्मकत्वे लक्षणालक्षितलक्षणसंज्ञिका भवति, यथा द्विरेफपदस्य मधुकरे सा स्ववाच्यरेफद्वयघटितपदवाच्यत्वरूपेति। तत्र सति किञ्चित्प्रयोजने लक्षणा चेत्तदा सा प्रयोजनवती शब्देन समुच्चार्य्यतेऽन्यथा तु निरूढाशब्देन। 'गङ्गायां घोष' इत्यत्र गङ्गागतशैत्यपावनत्वादिप्रतीतिप्रयोजनसत्त्वात्तत्रत्यलक्षणा प्रयोजनवती गीयते।

एवं 'त्वचा ज्ञातमि'त्यत्र त्वक्पदस्य या त्वगिन्द्रिये लक्षणा सा प्रयोजनविरहान्निरूढा शक्त्यपरपर्य्याया वाऽस्तीति परामृश्यते।

(अधिकलक्षणाभेदास्तु साहित्यदर्पणादिग्रन्थेभ्योऽनुसन्धास्यन्ते)

किन्त्वत्र शाब्दिकसिद्धान्तनादविधायिनो दर्शितलक्षणां कवलयन्त्यैव तथा हि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऐश्वरं तात्पर्यं देवतामहर्षिलोकवृद्धपरम्पराव्यङ्ग्यमालम्ब्य 'सति तात्पर्ये सर्वे सर्वार्थवाचना' इति पतञ्जलिभाष्यसिद्धान्तमनुरुध्य गङ्गादिपदेषु तीरादिनिरूपिता-शक्तिरेवास्तीति निश्चीयताम् । किन्तु गङ्गादिपदनिष्ठा तीरादिनिरूपिता या शक्तिः सा सहृदयहृदयमात्रवेद्यतयाऽप्रसिद्धाऽस्ति । अथ च विलक्षणजलप्रहादि-निरूपिता शक्तिरामन्दबुद्धिवेद्यतया प्रसिद्धाऽस्तीति निर्णीयताम् । अन्यथैकत्र गंगादिपदे यौगपद्येन वृत्तिद्वयकल्पनमन्याय्यमपि न्याय्यं विधेय स्यात् ।

तत्तत्पदप्रतिपाद्यतत्तत्पदार्थविषयकशाब्दबोधम्प्रति तत्तत्पदनिष्ठशक्तिलक्षणा-ज्ञानजन्योपस्थित्योः पृथक् पृथक् कारणत्वमपि कल्पनीयं स्यात् । अनुगतकार्य्य-कारणभावस्तु दुर्ज्ञेय एवेत्यत्र स्पष्टमिति दिक् ।

९––(प्र०) व्यञ्जनायाः स्वरूपं किम् ? किमर्थं साऽङ्गी कर्तव्या लक्षणया कथं न सा गतार्था, वैयाकरणानामपि व्यञ्जना कथमावश्यकी भवतीति नागेशसरण्या विशदयन्तु ॥

(उ०) व्यञ्जनात्वन्तावद्वक्त्रादिवैलक्षण्यहेतुका या प्रतिभाशालिनामन्यार्थ-धीस्तद्धेतुव्यापारत्वम् । प्रतिभा च वक्त्रादिवैशिष्ट्यसहकारेण जन्मान्तरीयतद्धी-जनकत्वप्रकारकज्ञानजन्यसंस्कारोद्बोधजबुद्धिरूपा, वासनाविशेषरूपेति यावत् ।

अयमाशयः—अभिधातात्पर्य्यलक्षणाख्यवृत्तीनां स्वस्वार्थबोधान्तरं क्षीणशक्ति-कतयाऽर्थान्तरबोधनेऽक्षमत्वाद् या वृत्तिः रसरसाभासभावभावाभाससन्धिशबलता-वस्त्वलङ्काराणां बोधने निमित्तभूता भवति सैव व्यञ्जनाऽस्तीति निर्धार्यताम् । व्यङ्ग्यार्थानामभिधेयार्थेभ्यो वैलक्षण्यं तु बोद्धृ--स्वरूप--संख्या--निमित्त--कार्य--प्रतीतिकाला--ऽऽश्रय--विषयादीनां निमित्तभूतानां भेदात् प्रत्यक्षमेव । तथा हि--

वाचकलक्षकशब्दार्थबोधनपटीयांसः केवलशक्यलक्ष्यार्थज्ञानसमर्था वैयाकरणाः काव्यज्ञसहृदयाश्च समानमेव भवन्ति, किन्तु व्यङ्ग्यार्थास्वादनपटीयांसस्तु केवल-काव्यज्ञसहृदया एव भवन्तीति बोद्धृभेदः ।

एवं स्वरूपभेदादपि व्यङ्ग्यशक्यार्थलक्ष्यार्थानां परस्परं भेदस्तथा हि–'भ्रम धार्मिकविश्वस्त ! स श्वाऽद्य मारितस्तेन गोदावरीकच्छकुञ्जवासिना दृप्तसिंहेने'त्यादिस्थले विधिरूपे वाच्यार्थेऽपि व्यङ्ग्यार्थबोधवेलायां भ्रमणनिषेध-स्यैव पर्यवसानं जायते । एवं 'निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरः'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इत्यादितोऽभिधावृत्त्या ऽधमान्तिकगमननिषेधे प्रतीयमानेऽपि व्यङ्ग्यार्थबोधनवेलायाम्- अधमान्तिकगमनसद्भाव एव प्रतीयते, तथा च स्वरूपभेदो वैषम्यात्मकोऽपि प्रत्यक्ष एव ।

संख्याभेदादपि वैलक्षण्यं यथा—"गतोऽस्तमर्क" इत्यादिस्थलेऽभिसारिकारूपबोद्धृस्थले कान्ताभिसरणं प्रतीयते, भृत्यबोद्धृस्थले-गोष्ठाधिकरणकविमुक्तगोकर्मकनिरोधनं प्रतीयते । शिष्यरूपबोद्धृस्थले सन्ध्यावन्दनोपासनसमयः प्रतीयते । विरहिणीरूपबोद्धृस्थले नायिकागमनावसरो द्योत्यते, इत्यादिरूपेणानेकसंख्याभेदाद्वैलक्षण्यं शक्यार्थलक्ष्यार्थव्यङ्ग्यार्थानां विज्ञेयम् ।

निमित्तभेदादपि वैलक्षण्यं यथा--शक्यार्थादिबोधः शब्दश्रवणादिवेद्यः, व्यङ्ग्यार्थस्तु सातिशयनिर्मलप्रतिभावेद्य इति ।

कार्यभेदादपि वैलक्षण्यं यथा --वाच्यार्थादयः केवलं स्वज्ञानमेव विषयतया जनयन्ति न पुनश्चमत्कारम्, व्यङ्ग्यार्थस्तु स्वज्ञानं चमत्कारसहितं विषयतया जनयतीति ।

प्रतीतिभेदादपि वैलक्षण्यं तथा हि--वाच्यार्थप्रतीतिः केवलशाब्दबोधरूपा, व्यङ्ग्यार्थप्रतीतिस्तु चमत्कारिशाब्दबोधस्वभावेति ।

कालभेदादपि वैलक्षण्यं तथा हि--वाच्यार्थादिप्रतीतिः प्राक्तनी, व्यङ्ग्यार्थप्रतीति स्तूत्तरकालिकीति ।

आश्रयभेदादपि वैलण्यं, तथा हि--वाच्यार्थादिप्रतीतिः प्रकृतिपदादिभ्य एव, व्यङ्ग्यार्थप्रतीतिस्तु पदपदैकदेशादिभ्योऽपीति ।

विषयभेदादपि वैलक्षण्यं यथा--"कस्य(१) न वा भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम् । सभ्रमरपद्मघ्राणिणि ! वारितवामे ! सहस्वेदानीम्" इत्यादिस्थले वाच्यार्थमादाय नायिका प्रतिपादयित्र्याः सहचरी उद्देश्या प्रतीयते । सभ्रमरपद्मघ्राणकाले तस्य भ्रमरस्य दशनादेव तस्या अधरे क्षतचिह्नं जातं न तूपपतेर्दन्तदंशनादित्येतादृशव्यङ्ग्यार्थमादाय तु तदीयपतिरेवोद्देश्यः, तथा च विभिन्नोद्देश्यकत्वेन विषयभेदः स्पष्टवत् ।

---

(१) दन्तक्षताधरां प्रियां प्रति उपपतिगमनकलङ्कमावेदयन्तं तदीयम्पतिमुद्दिश्य तदीयस्त्री सहचरी काचन तदीयस्त्रियं वक्ति–'कस्य न वा भवती'त्यादि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ च प्राक्प्रत्यक्षसिद्धादिपदार्थमेव बोधयति--अभिधावृत्तिरथ च लक्षणावृत्तिः, व्यञ्जना तु--प्राक्प्रत्यक्षाद्यसिद्धानुभवविशेषरसादिकमेव बोधयतीति कृत्वाऽपि वैलक्षण्यम् । किञ्च मुख्यार्थस्य बाधे सत्येव लक्षणावृत्तिरवतरति न तु मुख्यार्थबोधपूर्वकव्यङ्ग्यार्थबोधस्थले कदाऽपि लक्षणावृत्तेरवतरणं सम्भावितमपीति । कथन्तदा लक्षणया स्याद् गतार्था व्यञ्जनावृत्तिरिति विचार्यताम् एतादृशाभिप्रायमासाद्यैव व्यञ्जनाया विशदस्वरूपं मुख्यार्थबाधनिरपेक्षबोधजनकः मुख्यार्थसम्बन्धासम्बन्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जनेति वचनेति नागेशोऽपि तथैवाऽनुमेने ।

अथ च व्यञ्जनामस्वीकृत्य लक्षणयाऽर्थबोधने कथं शाब्दिकमते निपातानां द्योतकत्वं समायास्यति, तथा हि— द्योतकत्वं तावत-स्वसमभिव्याहृतपदनिष्ठशक्तिव्यञ्जकत्वं यथाऽनुसमभिव्याहारे भूधातोरनुभवार्थबोधकत्वं, प्रसमभिव्याहारे जप्धातोश्चप्रकृष्टजपबोधजनकत्वं प्रतीयते, तथा च स्वपदग्राह्याद्युप्रसमभिव्याहृतभूजपनिष्ठक्रमिकानुभवप्रकृष्टजपननिरूपितक्रमिकशक्तिव्यञ्जनकत्वात्तयोर्द्योतकत्वम्—अन्यथा केवलनिपातानां प्रयोगादर्शनेन तेषां मुख्यार्थाभावेन लक्षणयाऽपि तादृशार्थबोधासम्भवापत्तेः ।

न च एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति रीत्या व्यङ्ग्यार्थबोधे जाते तदर्थं व्यञ्जनाऽनावश्यकीति भ्रमितव्यं "गतोऽस्तमर्कः" इति वाक्यश्रवणोत्तरकाले सन्ध्यावन्दनादिकं विधेयमिति मया स्मृतमित्याद्यनुव्यवसायाभावात् तत्तानुल्लेखाच्च तथावक्तुमशक्यत्वात् ।

अथ च "इदम्पदमेतदर्थस्य न वाचकं, नापि लक्षकं, नापि स्मारकं, किन्तु व्यञ्जनकमितिसकलजनप्रामाणिकव्यवहारसंवेदनादसम्बद्धार्थस्यापि व्यङ्ग्यत्वाच्चानुभवसिद्धा व्यञ्जना कथमपलनीयेति विभावयन्तु सहृदयजनगोष्ठीश्रेष्ठा इति दिक् ।

१०—(प्र०) ननु कोऽयं वृत्त्याश्रयः शब्दः केनोपष्टम्भेनोत्थितोऽयं ग्रन्थः, तत्र नागेशेन कया रीत्या तार्किकाऽभिप्रायं प्रतन्य तन्मतं निराकृतं स्वमतञ्च स्थापितमिति स्पष्टमुपपादयन्तु ॥

(उ०) इदं ग्रन्थोत्थानबीजं श्रावणप्रत्यक्षविषयतापन्नैरपि कैश्चिच्छब्दैः विदुषां शाब्दबोधो न जायते गृहीतशक्तिकैश्च तैरेव श्रावणप्रत्यक्षविषयतापन्नैः विदुषां शाब्दबोधो जायते, तत्र किं निदानमिति जिज्ञासायां कार्य्यकारणभाव-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नियामकाऽन्वयव्यतिरेकाभ्यां तत्तदर्थविषयकशाब्दबोधम्प्रति तत्तदर्थवाचकपदनिष्ठ-शक्तिज्ञानत्वेन कारणत्वमिति प्रतिफलति। तथा च तदर्थनिरूपिताशक्तिः क्वेति जायमानायां जिज्ञासायाम्प्रकृतग्रन्थमवतारयति ग्रन्थकारः—ननु कोऽय-मित्यादिना।

अयमाशयः न तावद्घटादिशब्दानां घकारादिवर्णेषु सा शक्तिरस्तीति निश्चेतुं शक्यते तेषां प्रत्युच्चारणं भिन्नत्वेन तत्र शक्तिग्रहासम्भवात्। न च सकल-घटादिपदे आनुपूर्वीसाम्याच्छक्तिग्रहः सम्भवति, एकस्या आनुपूर्व्यास्तत्तद्वर्णोत्तर-तद्वर्णत्वरूपाया उच्चरितप्रध्वंसिवर्णेषु वक्तुकशक्यत्वात्।

अथ च सा शक्तिः प्रत्येकवर्णेषु वर्णसमूहेषु वा? नाद्यः पक्षः, एकवर्णो-च्चारणानन्तरमेव तावदर्थविषयकबोधापत्तेः वर्णान्तरोच्चारणवैयर्थ्यापत्तेश्च। नान्त्यः पक्षः, उच्चरितप्रध्वंसिनां तेषां वर्णानां साहित्यासम्भवात्, तथा हि-- वर्णोच्चारणस्य तदभिव्यक्तेर्वाक्षणस्यायित्वात् क्षणात्मककालस्याप्रत्यक्षतया तत्कालावच्छिन्नोच्चारणाभिव्यक्तिकवर्णानामपि प्रत्यक्षासम्भवात्, यत उच्चारणा-धिकरणकालोत्तरकालवृत्तिध्वंसप्रतियोगित्वस्यैवोच्चरितप्रध्वंसित्वपदार्थत्वात्। अथ च "इको यणचि" इत्यादिविधिशास्त्रेषु "तस्मिन्निति निर्दिष्टे पूर्वस्ये"त्यादि-परिभाषाशास्त्रोपस्थित्योभयसंवलितवाक्यार्थबोधे सञ्जातेऽजव्यवहितपूर्वत्व-विशिष्टेक्पदेन सुधीप्रभृतिघटकेकारादिर्धर्तुं न शक्यते यतः सुधीपदसमुच्चारणा-नन्तरम् उपास्य इति पदसमुच्चारणे तत्तद्वर्णानां विनष्टतया ऽविद्यमानत्वात् प्रत्यक्षविषयबोधकेदंशब्देन बोधयितुमशक्यत्वात्।

अत्र तार्किकाः समादधते—यद्यपि वर्णाः सन्त्यवश्यमुच्चरितप्रध्वंसिनस्तेषां साहित्यमेकत्रासम्भवि, तथाऽप्युच्चारणक्रमेणोत्तरोत्तरवर्णे पूर्वपूर्ववर्णाव्यवहितोत्तर-त्वमव्यवहितोत्तरत्वसम्बन्धेन पूर्वपूर्ववर्णवत्त्वं वा पूर्ववर्णस्यविनष्टत्वेऽपि संस्कार-वशादादाय सम्पूर्णपदस्य प्रत्यक्षत्वे तत्तद्वर्णेषु तत्तत्पौर्वापर्य्यस्य सुलभतया यणादिव्याकरणकार्य्यादेः सौलभ्यम्।

अथ च दर्शितक्रमिकोच्चरिततावद्वर्णानां सति प्रत्यक्षे ततः शाब्दबोधस्यापयु-पपत्तिः।

अथवा यथा एका समुद्रमध्यवर्तिवीचिर्वीच्यन्तरं जनयति साऽपि वीच्यन्तर— मिति कृत्वा वीचिप्रत्यक्षञ्जायते तटवर्तिपुंसस्तथैव—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पूर्वपूर्ववर्णजन्योत्तरोत्तरतत्तद्वर्णसदृशवर्णोत्पत्तौ चरमवर्णोत्पत्तिकाले तावद्-वर्णानां सति प्रत्यक्षे ततः शाब्दबोधस्योपपत्तिः, यणादिकार्यस्यापि च सौलभ्यम् ।

अथ वा चरमवर्णज्ञानकाले पूर्वपूर्ववर्णश्रवणस्य विनाशेऽपि पूर्वपूर्ववर्णश्रवणजन्य-संस्कारसहितचरमवर्णश्रवणस्यैव तत्पदप्रतिपाद्यार्थविषयकशाब्दबोधोपपादकत्वान्न काचन तदर्थे बहुविडम्बनाप्यालम्बनीया ।

किन्त्वत्र ब्रूमः—न हि नष्टविद्यमानौ अव्यवहितोत्तरत्वाव्यवहितपूर्वत्व—नियामकौ संस्कारवशादपि सम्भवतः, किन्तु विद्यमानावेव, कथन्तदा पूर्वपूर्ववर्णाव्यवहितोत्तरत्वमुत्तररोत्तवर्णे समनुसन्धाय पदप्रत्यक्षमुपपाद्य च शाब्दबोधेन कृतार्थाः स्युः ? । न वा प्रथमोऽथवाकल्पः क्षमः, शब्दजशब्दन्यायेन पदप्रत्यक्षोपपादनेऽपि उच्चरितपूर्वतनवर्णानामुत्तरवर्णोच्चारणकाले विनाशात् कथं साहित्यविशिष्टतावद्-वर्णेषु शक्त्याश्रयत्वमुपपाद्येत ? विनष्टानामप्याश्रयत्वे नष्टो घटो जलवानित्यापत्तेः ।

किञ्च पूर्वपूर्ववर्णानां वीचीतरङ्गन्यायेन तावदुत्पादे तथानियामकस्यादर्शनात्-कल्पनागौरवग्रस्तत्वाच्च यथावक्तुमशक्यत्वात् ।

नापि चरमोऽथ वा कल्पः क्षमस्तथाहि-येन क्रमेण वर्णानुभवस्तेथैव क्रमेण तत्संस्कार इति नियमस्याऽऽपणदृष्टवस्तुनिव्यभिचारादथ च "सरो रसः" "नदी"-इत्यादिपदेषु वैपरीत्येन कदाचित् संस्कारोत्पत्तौ तावत्पदेभ्यः समानार्थविषयक-शाब्दबोधापत्तेः, उत्पत्तिविनाशवद्वर्णसमुदायरूपपदस्य मनुष्यादिवद्भेदे "एकः इन्द्रशब्दः क्रतुशते प्रादुर्भूतो युगपत् सर्वयागेष्वङ्गं भवतीति भाष्यविरोधापत्तेश्चातो गौरित्येकम् पदं गामानय शुक्लामित्येकं वाक्यमित्यादिसार्वजनीनानुभवसिद्धवर्ण-तत्समूहातिरिक्ताबाधितपदवाक्याद्यात्मकस्फोट एव शक्त्याश्रयोऽस्तीति निर्धारणीय-मिति दिक् ।

११ (प्र०) कस्तावत्स्फोटपदार्थः किं स्फोटपदशक्यतावच्छेदकम् ? कियन्तस्तद्भेदास्तद्भेदानाञ्च काऽऽवश्यकता ? स्फोटानङ्गीकारे काक्षतिः ? अङ्गीकारे च कथं सर्वदोषपरिहारः कथं केन व्यङ्ग्य इति स्पष्टमुपपादयन्तु ॥

(उ०) स्फोटस्तावदान्तरप्रणवरूपत्वाद्—ब्रह्मस्वरूप एव "ओङ्कार एव सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नाना रूपा भवति" इति श्रुतेः,

"समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः ।
हृद्याकाशादभून्नादो वृत्तिरोधाद् विभाव्यते ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इत्यादिस्मृतेश्च स्पष्टमुपलब्धेः।

स च प्रणवरूपः स्फोट एकः सन्नपि नानावर्णपदवाक्यरूपध्वनिरूपोपाधिभेद-भिन्नो ऽन्तःकरणाद्युपाधिभेदभिन्ननानात्मकजीवस्वरूपब्रह्मवत् पदवाक्यादिनानात्मको मध्यमानादांशरूपरूपितो वैखरीरूपेण परश्रवणगोचरः सन्नन्तःकरणग्राह्यः सर्वार्थ-वाचको भवति। तथा च स्फुटत्यर्थो यस्मादिति व्युत्पत्त्या स्फुट्यते व्यज्यते वर्णैर्यः स इति व्युत्पत्त्या वाऽर्थप्रकाशकत्वमेव स्फोटत्वम् प्रकाशश्चज्ञानन्तथाचऽर्थनिष्ठविषय-ताप्रयोजकशक्तिमत्त्वमेव स्फोटपदशक्यतावच्छेदकमित्यनुसन्धातव्यम्।

अयमाशयः शाब्दिकानां—चतुर्विधा हि वागस्ति परा पश्यन्ती मध्यमा वैखरी च तत्र मूलाधारस्थपवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी परावागुच्यते, नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता मनोगो-चरीभूता पश्यन्ती वागुच्यते, एतद्द्वयं शब्दब्रह्मव्यञ्जकवाक्—योगिनां समाधौ निर्वि-कल्पकसविकल्पकज्ञानविषय इत्युच्यते, ततो हृदयपर्यन्तमागच्छता तेन वायुनाऽभि-व्यक्ता तत्तदर्थवाचकशब्दस्फोटरूपा श्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा जपादौ बुद्धि-निर्ग्राह्या मध्यमावागुच्यते। ततः आस्यपर्यन्तमागच्छता तेन वायुनोर्ध्वमाक्रमता च मूर्धानमाहत्य परावृत्य च तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापिग्राह्या वैखरी वागुच्यते। तदाह—

परा वाङ्-मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा॥ इति।
वैखर्या हि कृतो नादः परश्रवणगोचरः।
मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते॥ इति च।

तत्र वैखरीनादो ध्वनिः सकलजनश्रोत्रमात्रग्राह्यो भेर्यादिनादवन्निरर्थकः, किन्तु मध्यमानादोऽर्थवाचकस्फोटात्मकशब्दव्यञ्जकः सार्थको भवतीति। तथा च यथा मुखे मणिकृपाणदर्पणादिव्यञ्जकोपाधिवशाद्दैर्घ्यवर्तुलत्वादिकमवास्तविकमपि भासते तद्वदेव पटादिपदध्वनिरूपव्यञ्जकव्यङ्ग्यतया स्फोटेऽपि घटपटत्वादिकमभासते, व्यञ्जकवर्णपदवाक्याद्यात्मकध्वनीनामानन्त्यात् स्फोटस्याप्यानन्त्यं भवति यथा जपाकुसुमादिलौहित्यपीतत्वादिव्यञ्जकोपरागवशादेक एव स्वच्छः स्फटिकः 'लौहितः-स्फटिकः' 'पीतः स्फटिक' इत्यादिनानाऽनुभवविषयतामधिगच्छति नानात्मकश्च जायते तथैव प्रकृतेऽप्यनुसन्धेयम्। तथाचोपाधिकधर्मेण न वस्त्वानन्त्यमभवतीति विभाव्या-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऽऽकाशादिवदेक एव वास्तवस्फोट इति सिद्धान्तः। किन्तूपाधिभेदादष्टविधाः सम्पद्यन्ते तथाहि—वर्णपदवाक्यरूपध्वनिरूपितस्य भानाद् वर्णस्फोटः पदस्फोटः वाक्यस्फोटश्चेति त्रयः, तत्रापि जातिव्यक्तिभेदेन वर्णजातिस्फोटः पदजातिस्फोटः वाक्यजातिस्फोट इति त्रयः, पदवाक्ययोः खसण्डाखण्डत्वभेदादखण्डपदस्फोटः सखण्डवाक्यस्फोटश्चेति द्वौ, तथा च सङ्कलनयाऽष्टौ (१) स्फोटाः। ध्वनिस्तावद्द्विविध प्राकृतो वैकृतश्च तत्र प्रथमः प्रकृत्या बोधनेच्छया स्वभावेन वा जातत्वात् स्फोटव्यञ्जको भवति, द्वितीयस्तु न तथेति हरिरप्याह—

स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।
शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः॥

इत्यादिनेति दिक्।

१२ (प्र०)—शाब्दबोधे आकांक्षाज्ञानस्य सहकारिकारणत्वं कीदृशमिति प्रदर्श्याकाँक्षा शाब्दिकमते पदनिष्ठाऽर्थनिष्ठा वेति स्पष्टमुपपाद्य च यद्वेत्यादिदिनाऽन्यादृशाकाँक्षाप्रदर्शनस्याऽवश्यकतां विशदयन्तु।

(उ०) अयम्भावः शाब्दबोधे ज्ञायमानशक्तिमत्पदस्य पदनिष्ठशक्तिज्ञानस्य च मुख्यकारणत्वं करणत्वात्मकम्, आकांक्षाज्ञानस्य तु सहकारिकारणत्वं तच्च मुख्यकारणजन्यकार्य्यजनकत्वे सति मुख्यकारणभिन्नकारणत्वात्मकं स्वासमवधानप्रयुक्तफलोपधायकत्वाभाववन्मुख्यकारणकत्वम्, आकांक्षाज्ञानस्य शाब्दाधिकरणात्मन्यसमवधाने मुख्यकारणस्य पदनिष्ठशक्तिज्ञानस्य फलोपधायकत्वाभावाद् आकाँक्षाज्ञाने स्वासमवधानप्रयुक्तफलोपधायकत्वाभाववन्मुख्यकारणकत्वरूपसहकारिकारणत्वं निर्वहति।

आकाँक्षा चैकपदार्थमात्रज्ञानोत्तरं तदर्थान्वययोग्यापरपदार्थज्ञानविषयिणी "अस्यान्वय्यर्थः कः" इत्येवंरूपेच्छा।

तादृशाकाँक्षानिश्चयश्च शाब्दबोधे सहकारिकारणम्भवति यथा घटमानयेत्यादौ घटमित्युक्ते घटकर्मताज्ञानोत्तरं घटकर्मतापदार्थनिरूपिततात्पर्य्यविषयीभूतनिरूपकत्वसम्बन्धेनान्वययोग्यापरपदार्थाऽऽनयनादिज्ञानेच्छा जायते सा यद्यप्यात्मसमवेता तथापि तस्या आरोपोऽन्वयप्रतियोग्यनुयोगिपदार्थयोः समवायसम्बन्धेन विधेयः।

---

(१) शास्त्रप्रक्रियालोकानुभवसिद्धव्यवहारादीनाम् प्रसिद्धये तावतां स्फोटानामावश्यकताऽनुसन्धातव्या।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न चेच्छाविशेषात्मकाकांक्षायाः समवायसम्बन्धेन प्रतियोग्यनुयोगिपदार्थयोरसत्त्वेऽपि विषयतासम्बन्धेन सत्त्वात्कथमारोपः समवायसम्बन्धेन विधेयताऽऽवश्यक इति वाच्यं, विषयतासम्बन्धस्य वृत्त्यनियामकतयाऽऽधारतानियामकत्वासम्भवात्। साकाँक्षम्पदमित्यादौ तु—साकाँक्षार्थबोधपदे लक्षणां विधाय कार्य्यम्प्रचालनीयं न तु तस्याः पदेऽपि आरोपो विधेयस्तथासति समर्थसूत्रभाष्यविरोधापत्तेः, तथा हि तत्रोक्तं "परस्परं व्यपेक्षां सामर्थ्यमेके" इति पुनः शब्दयोर्व्यपेक्षेति ? न ब्रूमः शब्दयोरिति किं तर्हि अर्थयोरिति" अन्यथा शब्दनिष्ठाऽऽकाँक्षास्वीकारे भाष्यविरोधस्य दुर्वारतापत्तेः। अत एव यत्पदस्य यत्पदाभावप्रयुक्तशाब्दबोधाजनकत्वं तत्पदे स्वाव्यवहितपूर्ववृत्तित्व–स्वाव्यवहितोत्तरवृत्तित्वान्यतरसम्बन्धेन तज्ज्ञानञ्च कारणमिति ब्रुवाणास्तार्किका भवन्त्यश्रद्धेया इति। किन्त्वेतादृशाऽऽकांक्षायाः स्वीकारे घटः कर्मत्वमानयनं कृतिरिति वाक्यश्रवणतोऽपीतरकारणसमवधाने शाब्दबोधापत्तिः, प्रकृताकाँक्षाज्ञानस्यापि कारणस्य सत्त्वसम्भवादतआह—यद्वेत्यादि। अयमाशयः उत्थापकताविषयताऽन्यतरसम्बन्धेनोभयसम्बन्धेन वैकपदार्थज्ञानोत्तरापरपदार्थज्ञानेच्छावत्त्वैवाकाँक्षा यथा "पश्य मृगो धावती" त्यत्र दर्शनार्थस्य कारकधावनज्ञानेच्छोत्थापकतया दर्शितेच्छा वत्त्वम्। एवं "पचति तण्डुलं देवदत" इत्यादौ क्रियाकारकयोर्द्वयोरपि तत्तत्पदार्थस्यापरपदार्थज्ञानेच्छोत्थापकतयाऽऽकांक्षावत्त्वम्। घटः कर्मत्वमानयनं कृतिरित्यत्र घटकर्मत्वपदार्थयोस्तु नाकाँक्षा द्वितीयान्तपदोपस्थाप्यज्ञानोत्तरमेवाऽऽनयपदोपस्थाप्यार्थज्ञानेच्छोत्थितेः फलबलेन कल्पनादिति दिक्।

१३ (प्र०)—योग्यता स्वरूपसती कुतो न कारणम्भवति शाब्दबोधे, किं च तस्या लक्षणं ? किञ्चोदाहरणम् ? वह्निना सिञ्चतीत्यत्र कुतो न योग्यता ? कथं वाऽत्रक्रियाप्रकृष्टोपकारकत्वाभावाद् वह्नेः करणत्वम् ? अयोग्यतानिश्चयस्य प्रतिबन्धकतयैवेष्टसिद्धौ योग्यताज्ञानस्य कथङ्कारणत्वमिति स्पष्टं सर्वमाचष्टाम्॥

(उ०) स्वरूपसत्या योग्यतायाः शाब्दबोधाप्रयोजकत्वाद् योग्यताज्ञानस्यैव कारणत्वं क्लृप्तम्॥

तद्वाक्यजन्यतत्तदर्थनिष्ठविषयतानिरूपकशाब्दबोधम्प्रति तद्वाक्यघटकपदप्रतिपाद्यार्थनिष्ठविशेष्यतानिरूपकपरस्परान्वयबोधप्रयोजकधर्मप्रकारकं ज्ञानं कारणं,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तादृशञ्च ज्ञानं पदार्थोपास्थित्यनन्तरं ज्ञातव्यं, तदैव बाधज्ञानस्योदयात् । तथा-चेतादृशकार्य्यं कारणभावग्रहमूलकं परस्परान्वयप्रयोजकधर्मवत्त्वात्मकं योग्यत्वं प्रतिफलति, तज्ज्ञानञ्च कारणं यथा "पयसा सिञ्चती" त्यत्र सेकस्य पयःपदार्थं स्वनिरूपितकरणत्वं सम्बन्धस्तत्प्रयोजकधर्मश्च जलत्वात्मकस्तत्र वर्तते, एवं पयःपदार्थस्य सेके स्वनिष्ठकरणतानिरूपकत्वं सम्बन्धः, तत्प्रयोजकधर्मश्च सेकत्वादिस्तत्र वर्तते ऽतस्तत्र योग्यताज्ञाने तदितरकारणकलापसमवधाने च "पयसा सिञ्चती" ति वाक्येन जलनिष्ठकरणतानिरूपकार्द्रीकरणानुकूलैकाश्रयकवर्तमानकालावच्छिन्नो व्यापार इत्याकारः शाब्दबोधो जायते ।

वह्निना सिञ्चतीति वाक्यात्तु न शाब्दबोधोऽबाधितार्थविषयकस्तत्र तृतीयान्तार्थवह्निनिष्ठकरणतायाः सम्बन्धस्य निरूपकत्वात्मकस्य सेके बाधितत्वात् परस्परान्वयप्रयोजकधर्मस्य सेकत्वस्य तत्राभावेन योग्यताज्ञानस्य शाब्दबोधसामग्रीकुक्षिनिविष्टस्याभावे सामग्र्या एवाऽभावात् ।

तत्र शाब्दबोधस्त्वबाधितार्थविषयको न जायत इत्येव योग्यताज्ञानस्य कारणतया ध्वन्यते नतु सामान्यतः शाब्दबोधो न जायत इति वक्तुं शक्यते, बौद्धार्थमादाय शाब्द बोधे बाधकाभावात्, अन्यथा वह्निना सिञ्चतीति वाक्यं प्रयोक्तारमुद्दिश्य श्रोतुः "अद्रवेण वह्निना कथं सेकं ब्रवीषीत्युपहासवाक्यप्रयोगस्यानुपपत्त्यापत्तेः । किन्तु बौद्धार्थमादाय जायमानेऽपि शाब्दबोधे बाह्यार्थस्य बाधिततया ततः लोकानां वस्तुन्यप्रवृत्ति रेव तत्पर्यवसायिनी भवतीति निश्चेतव्यम् ।

न च यद्व्यापाराव्यवधानेन फलनिष्पत्तिस्तस्यैव प्रकृष्टोपकारकतया प्रकृते सेचन क्रियायां वह्नेः प्रकृष्टोपकारकत्वाभावात् ' साधकतमं करणमि"ति सूत्राप्रवृत्त्या कथं तत्र वह्निपदोत्तरतृतीयाश्रवणमिति वाच्यं, बुद्धिविषयीभूतार्थमादाय सेचनक्रियायां वह्नेः प्रकृष्टोपकारकत्वसम्भवेन करणसंज्ञाया उपपत्तौ तृतीयाश्रवणसौलभ्यात् । अथवा पाकादिक्रियानिरूपिता वह्निनिष्ठा या करणता तन्निरूपकत्वस्य सेकक्रियायां भ्रमं विधाय तथा समाधातुं शक्यत्वादिति ।

अयोग्यतानिश्चयस्य प्रतिबन्धकत्वमादाय तदभावस्य कारणत्वेन योग्यताज्ञानस्य न तदभावादन्यथासिद्धिर्विधातुं शक्यते, यतः यद्विषयकानुमित्यादिज्ञानं कदापि न जातं तत्र सामान्यतोऽयोग्यतानिश्चयस्य विशिष्टबुद्धिसामान्यम्प्रति प्रतिबन्धकताया

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वक्तुमशक्यतया तद्व्यक्तित्वावच्छिन्नप्रत्येवाऽयोग्यतानिश्चयस्य प्रतिबन्धकत्वं तदभावस्य कारणत्वं वाच्यं तदपेक्ष्ययोग्यताज्ञानत्वेन कारणतायामेव लाघवात्। अथ च तद्विषयकविशिष्टबुद्धिम्प्रत्ययोग्यतानिश्चयस्यैकरूपेण प्रतिबन्धकताऽपि न सम्भवति, यतः तादृश बोधेच्छासत्त्वेऽयोग्यतानिश्चयेऽपि तादृशबोधोदयात्। तथा च तत्तद्बोधेच्छाविरह वैशिष्टचस्य तत्तदयोग्यतानिश्चयेऽवश्यं वाच्यतया सामान्यप्रतिबध्यप्रतिबन्धकभावस्यैवासम्भवः।

वस्तुतो बाधादिज्ञानस्य न प्रतिबन्धकत्वं बाधादिज्ञाने जागृतेऽपि तदभावेतरकारणघटितसामग्र्यां सत्यां शाब्दबोधस्य जननात्, किन्तूत्तरकालं दोषघटितसामग्रीजन्यतया तस्मिञ्छाब्दबोधेऽप्रमात्वं निर्धार्यते इत्येव तत्र बीजमिति स्पष्टं लघुमञ्जूषायामिति संक्षेपः।

१४—(प्र०) प्राचीनैरासत्तिज्ञानस्य कारणत्वं कथं मन्यतेऽकारणत्वे कथं वा नव्यानां निर्वाहः? आसत्तिस्तन्मते स्वरूपसतो ज्ञाता वा कारणं? कीदृशी परिष्कृताऽऽसत्तिर्यस्या ज्ञानङ्कारणं स्यादिति स्पष्टतया निरूपयन्तु॥

(उ० आसत्तिज्ञानं मन्दस्य शाब्दिकस्याविलम्बेन शाब्दबोधे कारणं भवति, अमन्दस्य शाब्दबोधे तु न तज्ज्ञानङ्कारणतयाऽपेक्षितम्। अतः सामान्यतः शाब्दबोधे आसत्तिज्ञानस्याकारणत्वमेव व्यवस्थापितं नव्यशाब्दिकैः, मन्दस्यापि तद्विरहेऽपि विलम्बेन शाब्दबोधदर्शनात्।

आसत्तिश्च तात्पर्यविषयीभूतसम्बन्धप्रतियोग्यनुयोगिपदार्थानां तद्वाचकपदानाञ्च-स्वज्ञानकालाधिककालेन प्रकृतानुपयोगिपदार्थोपस्थित्वा च यद्व्यवधानं तदभावविशिष्टप्राथमिकोपस्थितिरेव, उपस्थितौ प्राथमिकत्वञ्च योजनावाक्यप्रयोज्योपस्थित्यपेक्षया पूर्वकालिकत्वमेव, तथा च "सम्बन्धप्रतियोग्यादिपदार्थानामव्यवधानेन प्राथमिकोपस्थितिरासत्ति"रिति पक्षे स्वरूपसत्या एवासत्तेः प्राचाम्मते कारणत्वं, सम्बन्धप्रतियोग्यनुयोगिपदार्थबोधकपदानामव्यवधानेन प्राथमिकोपस्थितिरासत्तिरि" ति पक्षे तु "गिरि भुंक्तमग्निमान् देवदत्तेने" त्यादौ गिरिमदग्निमत्पदयोरव्यवधानभ्रमे सति तद्वाक्येन अग्निमदभिन्नगिरिविषयकशाब्दबोधस्य जायमानतया तत्र स्वरूपसत्या आसत्तेश्चाऽभावाज्ज्ञातैव सा कारणमिति विभावनीयम्।

तत्रासत्तौ तादृशकालकृतव्यधानाभावनिवेशेनेदानीमुच्चरितेन "देवताः" इति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पदेन प्रहरादिव्यवधानेनोच्चरितेन ' गच्छती'' तिपदेन च मिलित्वा देवदत्तकर्तृक-वर्तमानकालावच्छिन्नगमनविषयकशाब्दबोधो न भवति ।

प्रकृतानुपयोगिपदार्थोपस्थितिकृतव्यवधानाभावनिवेशेन च स्थाल्यामोदनं पचतीतिवाक्येन जायत एव शाब्दबोध: । तत्रौदनपदस्य तत्पदार्थस्य वोपस्थिते: प्रकृतेऽनुपयोगित्वाभावात् । ''गिरिर्भुक्तमग्निमान् देवदत्तेने''तिवाक्यादग्निमदभिन्नगिरिविषयक — देवदत्तकर्तृकभोजनविषयकाभीप्सितशाब्दबोधद्वयमासत्तिभ्रमविकलस्य पुंसस्तु कदापि न भवति, क्रमश:भुक्तमितिपदजन्योपस्थितेर्गिरिरग्निमानितिपदजन्योपस्थित्योर्मध्ये व्यवधानात् ।

यद्यपि उपस्थित्यात्मिकाऽऽसत्तिरात्मसमवेतैव तथापि स्वजन्यशाब्दबोधजनकत्वादिसम्बन्धेन पदधर्मत्वं विज्ञाय पदनिष्ठैवाऽऽसत्तिरिति विभावनीयमिति दिक् ।

१५––(प्र०) कीदृशतात्पर्य्यज्ञानस्य शाब्दबोधे कारणत्वमभिप्रेतं ? वेदवाक्यादिस्थले कस्य तात्पर्यं विज्ञाय शाब्दबोध: समुपपाद्यते ? शक्तिनियामक प्रकरणादिना तस्यान्यथासिद्धत्वं क्वेति सर्वं स्पष्टतया विवेचनीयम् ॥

(उ०) तत्पदजन्यतदर्थविषयकशाब्दबोधम्प्रति तदर्थविषयकबोधजनकत्व कारतानिरूपिततत्पदनिष्ठविशेष्यताकं तत्पदजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपिततदर्थनिष्ठविशेष्यताकंवैतत्पदमिममर्थंबोधयत्वित्याकारकम् ''अस्मात्पदादयमर्थो बोद्धव्य इत्याकारकं वा वक्तृतात्पर्य्यज्ञानङ्कारणमितिकार्य्यकारणभावमादाय इदम्पदमिमर्थं बोधयतु'' एतत्पदादयमर्थो बोद्धव्य इत्याकारकंवावक्तृतात्पर्य्यज्ञानं कारणम् प्रतिफलति। अथवैतदर्थनिष्ठप्रकारतानिरूपितैतदर्थनिष्ठविशेष्यताशालिशाब्दबोधेच्छयावक्रोच्चरितमिदं वाक्यमिति शाब्दबोधतात्पर्यज्ञानयो: कार्यकारणभाव: । शाब्दबोधम्प्रति वक्तृतात्पर्य्यनिश्चयस्यकारणत्वकल्पनादेव सति तात्पर्य्ये सर्वेसर्वार्थवाचका इति शाब्दिकनये घटशब्दादिभ्य: पटाद्यर्थविषयकबोधो न भवति वक्तुस्तत्रतात्पर्य्यानिश्चयात् । नानाधर्मावच्छिन्ननिरुपितनानाशक्तिमत्पदस्थलेऽपि वक्तुस्तादृशतात्पर्य्यनिश्चयमवधार्यैव तद्वाक्यादभीप्सितार्थविषयकशाब्दबोधो विधातव्य: । वेदादिवाक्यस्थलेऽपीश्वरादितात्पर्यमवधार्यैव शाब्दबोध उपपादनीय: । तात्पर्य्यनियामकप्रकरणादे: शक्तिनियामकत्वेन न तत्पदनिष्ठशक्त्या नानार्थकपदस्थले शाब्दबोधनिर्वाहो यतोऽस्माच्छब्दादर्थद्वयविशेष्यकबोधो धायतेऽर्थद्वयेशक्तिसत्त्वात् तात्पर्यं तु क्वेति न

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जानीम इत्यनुभवात् । अत एव च पय आनयेत्युक्तेऽप्रकरणज्ञस्य दुग्धंजलं वाऽऽनेयमिति प्रश्नः सङ्गच्छते, अतः नानार्थकशब्दस्थलेऽभीप्सितार्थविषयकशाब्दबोधसम्पादनाय तात्पर्य्यनिश्चयस्य कारणत्वमवधार्यमेवेति दिक् ।

१६—(प्र०) फलव्यापारयोः प्रतिपदव्यावृत्तिप्रदर्शनपूर्वकं लक्षणं निर्दुष्टम्प्रदर्श्य धात्वर्थफलजनकत्वे सति धातुवाच्यत्वमिति व्यापारलक्षणे केवलव्यापारवाचकाकर्मकधातुस्थले तद्वाच्यव्यापारे कुतो नाव्याप्तिः ? अव्याप्तौसत्यां को वोद्धारयत्न इतिनिपुणं विलिखन्तु ।।

(उ०) यद्यपि लोके रूढिशक्त्या फलपदस्य विक्लित्याद्यर्थोपस्थापकत्वं सम्भवति, तथापि शास्त्रे पारिभाषिकत्वमेवानुसन्धेयम् फलपदस्य, तथा च फलत्वं तावन्नागेशाभिमतं धातुविशिष्टत्वं वैशिष्ट्यश्च स्वार्थजन्यत्वे सति कर्तृप्रत्ययसमभिव्याहाराधीनस्वार्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वसम्बन्धेन, पचादिधात्वर्थविक्लित्यादौ लक्षणसमन्वयस्तस्य पच्धातुवैशिष्ट्यं वर्तते यतस्तस्य पच्धात्वर्थव्यापारजन्यत्वात् कर्तृप्रत्ययसमभिव्याहारे व्यापारनिष्ठविशेष्यतानिरूपितानुकूलत्वसम्बन्धावच्छिन्नप्रकारताश्रयतयैव च भानात् तत्र कर्तृप्रत्ययसमभिव्याहाराधीनपचधात्वर्थव्यापारनिष्ठविशेष्यतानिरूपितानुकूलत्वसम्बन्धावच्छिन्नप्रकारतावत्त्वात् ।

वैशिष्ट्यघटकसत्यन्तदलनिवेशात् विभागजन्यसंयोगस्य पत्धात्वर्थत्वेऽपि न तदीय विभागे फललक्षणस्यातिव्याप्तिः—

तत्र पत्धात्वर्थसंयोगनिष्ठविशेष्यतानिरूपितानुकूलत्वसम्बन्धावच्छिन्नप्रकारतावत्त्वस्य सत्त्वेऽपि पत्धात्वर्थनिरूपितजन्यत्वाभावात् किन्तु तत्र पत्धात्वर्थनिरूपितजनकताया एव सत्त्वात् । एवं वैशिष्ट्यघटकविशेष्यदलनिवेशात् तदीयसंयोगेनाऽतिव्याप्तिस्तत्रपत्धात्वर्थविभागजन्यत्वेऽपि पत्धात्वर्थनिष्ठविशेष्यतानिरूपितजन्यत्वसम्बन्धावच्छिन्नप्रकारत्वविरहादिति । वैशिष्ट्यघटकविशेष्यदले कर्तृप्रत्ययसमभिव्याहाराधीनत्वनिवेशान्न कर्मप्रत्ययसमभिव्याहारमादायाव्याप्तिशङ्काऽपीतिदिक् ।

व्यापारत्वं तावद् धातुविशिष्टत्वं वैस्वार्थफलजनकत्वेसति स्ववाच्यत्वसम्बन्धेन, वैशिष्ट्यघटकविशेष्यदलमात्रनिवेशे धात्वर्थफलेऽतिव्याप्तिः स्यात्, सत्यन्तदलमात्रनिवेशेतु देवदत्तः पचतीत्यादिस्थले धातोः कर्तृवृत्तिव्यापारविवक्षायामपिकाष्ठतण्डुलादिव्यापारेऽतिव्याप्तिस्तस्यापि—पच्धात्वर्थविक्लितिरूपफलजनकत्वात् विशे-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ष्यदलनिवेशेतु तदानीम् पच्धातुवाच्यत्वाभावान्नातिव्याप्तिः। काष्ठादिवृत्तिव्यापाराणां पच्धात्वर्थत्वविवक्षायां तदीयव्यापारेषु व्यापारलक्षणगमनमिष्टमेव अत एव "काष्ठं पचति" "स्थालीपचती"त्यादिप्रयोगा अपि सङ्गच्छन्ते। किन्त्वेतादृशव्यापारलक्षणे कृते अस्धात्वादिस्थले तदीयव्यापारे तल्लक्षणाव्याप्तिस्तत्र लेशतोऽपि फलांशेस्यादर्शनात् – स्वार्थफलजनकत्वरूपस्य सत्यन्त दलस्य तत्र विरहादतः पदान्तरसमभिव्याहाराप्रयोज्यसाध्यत्वप्रकारकाभिधानविशेष्यत्वम् एव व्यापारत्वमनुसन्धेयम्, अभिधानविशेष्यतानिरूपकत्वञ्चौपचारिकम्, एतादृशव्यापारत्वञ्च अस्धात्वादिस्थले तत्तद्धातृव्यापारेऽक्षुण्णमेव। घटङ्करोतीत्यादिस्थले घटेऽतिव्याप्तिवारणाय पदान्तरसमभिव्याहाराप्रयोज्यत्वविशेषणं विज्ञेयमन्यथा कृन्समभिव्याहारे घटादीनावपि साध्यत्वेनाभिधानविषयत्वाद्व्यापारत्वापत्तेः। अधिकन्तु स्वयमनुसन्धेयमितिदिक्।

१७–(प्र०) फलव्यापारयोर्धातूनां खण्डशः शक्तिर्विशिष्टा वा? नागेशाभिमता का? सा वास्तविकीनवेति सप्रमाणं सयुक्तिकं विवेचयन्तु॥

(उ०) यद्यपि कौण्डभट्टप्रभृतयः "फलव्यापरयोर्धातुराश्रये तु तिङः" स्मृताः इति शाब्दिकशिरोमणिभर्तृहरिवचनमनुमध्य धातोः फले व्यापारे च खण्डशक्तिमेवाभ्युगच्छन्ति, अन्यथा द्विवचनानुपपत्तिः स्यादिति वर्णयन्ति। नच तथा सति यथा हरिपदनिष्ठविभिन्नशक्तिज्ञानाधीनोपस्थितमेकादीनाम् परस्परान्वयो न भवति तथैव धातुनिष्ठविभिन्नशक्तिज्ञानाधीनोपस्थितफलव्यापारयोरपि परस्परमन्वयो न स्यादिति वाच्यं व्युत्पत्तिवैचित्र्येण एवकारार्थान्ययोगव्यवच्छेदयोः नैयायिकमते आख्यातार्थकृतिवर्तमानत्वयोरिव तयोरपि परस्परमन्वयसम्भवादित्यादिकञ्च विशदयन्ति। किन्तु नागेशस्यायमाशयः— फलव्यापारनिरूपितखण्डशक्तेः धातौ स्वीकारे विभिन्नशक्तिज्ञानजन्यविभिन्नोपस्थितिविषयतावतोः "नीलो घट" इति स्थले नीलघटयोरिव फलव्यापारयोरपि उद्देश्यविधेयभावेनान्वयापत्तिः स्यात्।

विभिन्नपदनिष्ठविभिन्नशक्तिज्ञानाधीनोपस्थितिविषयतावतोरेव पदार्थयोः परस्परमुद्देश्यविधेयभावेनान्वयो भवतीति कल्पनेऽपि फलत्वावच्छिन्नप्रकारतानिरूपितव्यापारत्वावच्छिन्नविशेष्यताकशाब्दबोधम्प्रति कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणम्, अय च व्यापारत्वावच्छिन्नप्रकारतानिरूपितफलत्वावच्छिन्नविशे-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ब्यताशालिशाब्दबोधम्प्रति कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणमिति रीत्या कार्यकारणभावद्वयकल्पनं स्यादथ च धातोरर्थद्वयनिरूपितशक्तिद्वमकल्पने च नानाधर्मावच्छिन्ननिरूपितनानाशक्तिनिरूपकतावच्छेदकैकधर्मवत्त्वेन प्रत्येकधातोः सकर्मकस्य नानार्थकत्वापत्तेश्च। अथ च सर्वत्र कर्तृकर्मप्रत्ययसमभिव्याहारस्थले द्विविधोपस्थितेः शाब्दबोधम्प्रतिकारणत्वं कल्पनीयं स्यात्। किञ्च सकर्मकप्रत्येकधातोः तत्तदर्थविषयकबोधजनकत्वात्मकसम्बन्धद्वयकल्पनमपि स्यात्। अथ च समानविषयकानुमित्यादिस्थले शाब्दसामग्र्याः प्रतिबन्धकत्वे कल्पनीये द्विविधोपस्थितिघटित-सामग्र्या एव गुरुभूतायाः प्रतिबन्धकत्वं स्थिरीकरणीयं स्यात्। अतः फलविशिष्टव्यारे व्यापारविशिष्टफले वा एकैव शक्तिः कल्पनीया। विशेष्यविशेषणभावबोधे कर्तृकर्मप्रत्ययसमभिहारज्ञानस्य नियामकत्वमाकलनीयमिति।

किन्तु विनिगमनाविरहात् फलविशिष्टव्यापारे व्यापारविशिष्टफले चाऽनायत्या धातोऽ शक्तिः स्वीकरणीया स्यादेव। तथाच गुरुरूपेणोपस्थियिद्वयप्रसञ्जनमिहैव समापतेदतः एकवृन्तावलम्बिफलद्वयवदुभयांशे खण्डशः एकांशक्ति—

विज्ञाय नानार्थकत्वशङ्काशक्तिद्वयकल्पनादिसर्वापत्तयोनिराकारणीयाः, अथ च लाघवद्योतकः खण्डशक्तिपन्था एव समीचीनः श्रद्धेय इति संक्षेपः।

अथ च फलव्यापारयोरेकदेशतया पदार्थः पदार्थेनान्वेति ननु पदार्थैकदेशेनेति न्यायात्तत्र कर्मकर्त्रादीनामन्वयासम्भवापत्तेश्च॥

१८—(प्र०) फलं धात्वर्थो भावना (व्यापारः) प्रत्ययार्थ इति मीमांसका वदन्ति तन्मतं शाब्दिकैः कथमवहेलितम्? इति स्पष्टतया निरूपयन्तु।

(उ०) मीमांसकानाम् मण्डनमिश्रप्रभृतीनामयमाशयः पच्-गम्-त्यज्-पत्प्रभृतिधातूनां विक्लितिसंयोगपूर्वदेशविभागोत्तरदेशसंयोगादयः फलान्येव क्रमशोऽर्था विज्ञेयास्तदनुकूलव्यापारस्तु आख्यातार्थः, आख्यातार्थवर्तमानत्वादिनाञ्च तदर्थव्यापारे एवान्वयः, कर्ता कर्मचाक्षेपत एव लप्स्यते, फलस्यचाख्यातार्थव्यापारम्प्रति विशेषणत्वमिति। किन्तु "लः कर्मणिचभावेचाकर्मकेभ्यः" इति सूत्रविरोधापत्तेस्तन्मतं न युक्तम्—यथाहि तेन सूत्रेण सकर्मकधातुभ्यः कर्मणिकर्तरिचैव लकारस्य विधीयमानत्वात्। नच तत्सूत्रीयवर्तमानानुवर्तमानकर्मकर्तृपदे भावप्रधाने स्तस्त-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

थ्याच कर्मत्वकर्तृत्वयोः परिष्कारदिशा फलभावनापर्य्यवसायित्वात् सूत्रस्यापि तत्रैव तात्पर्यमिति वाच्यम् "पचति" पक्ष्यति" पक्ववान् इत्यादौ फूत्कारादिभावनाप्रतीतयेऽनेकप्रत्ययानाम् आख्यातानाख्यातसाधारणानाम् फूत्कारादिभावनानिरूपितशक्त्याश्रयत्वकल्पनाऽऽपेक्षया केवलपच्धातावेव तत्कल्पनाया लाघवात् ।

नच प्रत्युच्चारणं शब्दो भिद्यते इति नियमाद् धातावपि शक्तिकल्पने तदपेक्षया लाघवविरह एवेति वाच्य, तथाप्याख्यातस्य फूत्कारादिभावनावाचकत्वे गच्छतीत्यादि स्थलीयाख्यातेन फूत्कारादिबोधापत्तिवारणाय तत्तद्भावनाबोधे आख्यातसमभिव्याहृततत्तद्धातुसमभिव्याहारस्य नियामकत्वकल्पनेऽतिगौरवात् । नच धातोर्भावनावाचकत्वमतेऽपि विशेषव्यापारबोधम्प्रति तत्तद्धातुसमभिव्याहारस्य कारणत्वमवश्यं वाच्यमिति क्वातिगौरवमिति वाच्यं, तथापि धातोः सकर्मकत्वाकर्मकत्वव्यवहारोच्छेदापत्तेः, तथाहि धातोर्व्यापारवाचकत्वे स्वार्थफलव्यधिकरणव्यापारवाचकत्वं स्वस्य सकर्मकत्वमथचस्वार्थफलसमानाधिकरणव्यापारवाचकत्वं स्वस्याकर्मकत्वमिति रीत्या तत्तद्धातोः सकर्मकत्वाकर्मकत्वव्यवहारोपपत्तिरथ धातोर्व्यापारावाचकतया तथासकर्मकत्वाकर्मकत्वयोर्वक्तुमशक्यत्वात्तद्व्यवहारानुपपत्तिः स्यात् ।

नच व्यापारस्याख्यातार्थत्वेऽपि प्रत्ययार्थव्यापारव्यधिकरणफलवाचकत्वेन सकर्मकत्वव्यवहारस्य प्रत्ययार्थव्यापारसमानाधिकरणफलवाचकतयाऽकर्मकत्वव्यवहारस्य प्रत्ययार्थव्यापाराश्रयत्वेन कर्तृत्वव्यवहारस्य चोपपत्तिर्भविष्यत्येवेति वाच्यं, तथाप्याख्यातस्य कर्तृकर्मावाचकतयाऽभिधानानभिधानव्यवस्थोच्छेदापत्तेस्यथाहि कर्तरिलकारे कर्तरि अभिधानव्यवस्थायाः कर्मणिलकारे कर्माभिधान व्यवस्थायाश्चोपपत्तिरथ कर्तृकर्मणोस्तन्मते आक्षेपाद् भानेन तथावक्तुमशक्यत्वात् । नच स्वाश्रयं विनाऽनुपपन्नौ फलव्यापारौ स्वाश्रयकर्तृकर्मणी आक्षिपतस्तथाच व्यापाराक्षिप्तकर्तारमादाय कर्त्रभिधानस्य फलाक्षिप्तकर्मादाय कर्माभिधानस्य वक्तुं शक्यत्वमिति वाच्यम् तथासति सर्वत्र कर्तृकर्माख्यातस्थले जात्याक्षिप्तव्यक्तेरिव व्यापारफलाक्षिप्तकर्तृकर्मणोरपि मुख्यविशेष्यत्वापत्त्या 'क्रियाप्रधानमाख्यातं सत्त्वप्रधानानि नामानी'ति यास्कव्यवस्थाया विच्छेदापत्तेः ।

अथ च फलस्य धातुना तदाश्रयस्य चाक्षेपेण लाभसिद्धौ "लः कर्मणि" इति सूत्रवैयर्थ्यापत्तेः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ चाभेदान्वयाय कर्मकर्तृक्तां कारकभावनोभयवाचकत्वे गौरवापत्तेश्च ।

किञ्च भावविहितघञादीनां व्यापारवाचकत्वे ग्रामोगमनवानिति वाक्यात् संयोगाश्रयग्रामविषयकशाब्दबोधापत्तेः, व्यापारवाचकत्वे च तेनाऽपि तदाश्रयस्य चाक्षेपे कर्तुरभिधानापत्तेः । किञ्च गुरुशिष्याभ्यां पाचयतीत्यत्र प्रयोजकव्यापारस्य णिजर्थतया प्रयोज्यव्यापारस्याख्यातार्थत्वमाकलनीय तथा चाख्यातवाच्यसंख्याया आख्यातवाच्यव्यापारान्वयिन्यान्वयस्यैकपदोपस्थाप्यत्वेनावश्यकतया शिष्याभ्यामितिद्विवचनानापत्तेः, तत्स्वीकारेच पाचयतीत्यत्रैकवचनासम्भवापत्तेः, अथ चाख्यातार्थव्यापारस्य प्रधानतया तदाश्रयत्वेन शिष्यशब्दात् प्रथमापत्तेर्गुरोस्तदनापत्तेश्च ।

अथ च क्रियावाचकत्वाभावेन भ्वादिव्रपठितत्वेऽपि गम्प्रभृतीनां धातुत्वमेव-व्याहन्येताऽधिकं भूषणादौ स्पष्टमेवातो न मीमांसकमतं विचारसहमिति दिक् ।

१९--(प्र०) यावत् सिद्धमसिद्धं वेत्यादि व्यपदिश्यते इत्यन्तं कारिकाद्वयं सोपष्टम्भं व्याख्याय केवलाधिश्रयणादिव्यापारस्थले पचतीत्यादिप्रयोगमुपपाद्य सिद्धत्वं साध्यत्वं च सोदाहरणं परिष्कृत्य प्रदर्शयन्तु !

(उ०)अयामशयो वर्तमानध्वंसप्रतियोग्यधिश्रयणाद्यधःश्रयणान्तव्यापारसमूहस्य अपाक्षीदित्यादिप्रतिपाद्यस्य, वर्तमानप्रागभावप्रतियोग्यधिश्रयणाद्यधःश्रयणान्तव्यापारसमूहस्य पक्ष्यतीत्यात्यादिपदप्रतिपाद्यस्य, वर्तमानाधिश्रयणाद्यधःश्रयणान्तव्यापारकलापस्य पचतीत्यादिपदप्रतिपाद्यस्य सर्वस्यापि निष्पाद्यतयैव प्रतीत्या तेषां साध्यत्वमेवास्तीत्येवावधेयम् ।

तावत्क्रमजन्मव्यापारसमूहस्यावयवविशिष्टावयविनः शरीरित्वमिव क्रियात्वव्यवहारो वास्तविकः, किन्तु तथासति तत्तत्क्रियाणामाशुविनाशितयैकदा समेषामुपलम्भासम्भवात् कथं क्रियात्वव्यवहारो मुख्यतयोपपादनीय इति जागर्ति शङ्का, तथापि कारिकांशेन तावत्क्रियाकलापे बुद्धिविषयतामापाद्य क्रियात्वं सम्पाद्य शङ्कानिराकरणीयेति । यत्र केवलाधिश्रयणवेलायामेव पचतीत्यादिव्यवहारो भवति तत्र यद्यपि वास्तवपच्धात्वर्थं क्रिया न भवति बुद्धिविषया तथाप्येकस्मिन्नेव व्यापारे व्यापारसमूहरूपक्रियात्वमारोप्यव्यवहारः सम्पादनीय इति । एतादृशखावमासाद्यैव "एकदेशे समूहे वा व्यापाराणां पचादयः । स्वभावतः प्रवर्तन्ते तुल्यरूपं समाश्रिता" इति हरिकारिका चरितार्था भवतीति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रियानिष्ठं साध्यत्वं तावत् क्रियान्तराकांक्षानुत्थापकतावच्छेदकरूपवत्त्वे सति कारकान्तरान्वययोग्यतावच्छेदकधर्मवत्त्वं यथा पचति करोतीत्यादौ पचतिप्रतिपाद्य-पाकक्रियया करोतिप्रतिपाद्योत्पत्त्यनुकूलव्यापारक्रियया च क्रियान्तराकांक्षाया अनुत्थानात् कारकान्तरान्वययोग्यतावच्छेदकधर्मवत्त्वाच्च तत्र साध्यत्वव्यवहारः। सिद्धत्वं तावत् क्रियान्तराकांक्षोत्थापकतावच्छेदकवैजात्यवत्त्वे सति कारकत्वेन क्रियान्वयित्वे सति कारकान्तरान्वययोग्यत्वं, यथा पाकः कृतिरित्यादिप्रतिपाद्य-पाकादिक्रिया सिद्धात्मिका——तथाहि पाक इत्यादिप्रतिपाद्यक्रियाज्ञानानन्तरम् -अभूदस्तिभविष्यतीत्यादिपदप्रतिपाद्यक्रियाया नैयत्येनाकांक्षादर्शनात् कारकान्तरेणान्वयित्वायोगात् कारकत्वेन क्रियान्वयित्वाच्चावश्यन्तत्र सिद्धत्वमास्थेयम् ।

'हरिन्नमेच्चेत्सुखं यायादि'त्यत्र नमनक्रियायाः क्रियान्तराकाँक्षोत्थापकत्वेऽपि पदान्तरसमभिव्याहाराप्रयोज्यत्वस्यैव क्रियान्तराकांक्षोत्थापकतायां निवेशान्न तत्र सिद्धत्वापत्तिः ।

वस्तुतः साध्यत्वम्—पदान्तरसमभिव्याहाराप्रयोज्यनिष्पाद्यत्व प्रकारकप्रमात्मकज्ञानविशेष्यत्वमेव, घटंकरोतीत्यादौ करोतिसमभिव्याहारेण घटे तादृशविशेष्यतायाः प्रतीतावपि तरसमभिव्याहारे निष्पन्नतयैव प्रतीतेर्न तत्र क्रियानिष्ठसाध्यत्वशङ्काऽपीति ।

२० (प्र०) सकर्मकत्वाकर्मकत्वलक्षणे निर्दुष्टे परिष्करणीये ? संयोगादेरुभयनिष्ठतया स्वार्थफलसमानाधिकरणव्यापारवाचकत्वात्मकाकर्मकत्वलक्षणस्य कुतो नातिव्याप्तिः, "अस् विद्' प्रभृतीनां केवलव्यापारवाचकतया कथं न तत्राकर्मकत्वलक्षणस्याव्याप्तिरिति स्पष्टमुपपादयन्तु ।

(उ०) यद्यपि स्वार्थो यः फलव्यधिकरणव्यापारस्तद्वाचकत्वंस्वनिष्ठं सकर्मकत्वं, तच्च गम्धातुप्रभृतिष्वव्याप्तं तथाहि—गम्धात्वाद्यर्थतावच्छेदकफलस्य संयोगादेर्व्यापारसमानाधिकरणत्वात् तथापि धातुविशिष्टत्वमेव स्वनिष्ठ सकर्मकत्वं विज्ञेयं धातुवैशिष्ट्यञ्च—स्वार्थफलाव्यापकव्यापारवाचकत्वसम्बन्धेन; व्यापकत्वञ्च स्वाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकत्वं, व्याप्यतावच्छेदकसम्बन्धः फलतावच्छेदकसम्बन्ध एव, व्यापकतावच्छेदकसम्बन्धः व्यापाराधिकरणतानियामकः समवायादिस्तथा च न गम् प्रभृतिधातुषु सकर्मकत्वानुपपत्तिस्तथाहि —गम्प्रभृतिधात्वर्थताव-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

च्छेदकसंयोगादिफलानां व्यापाराधिकरणवृत्तित्वेऽपि समवायादिसम्बन्धेन व्यापारानधिकरणकर्मसंज्ञकार्थेष्वपि सत्त्वाद् धात्वर्थफलाव्यापकव्यापारवाचकताया गम्प्रभृतिधातौ सत्त्वात्। नवाजीवादिधातौ सकर्मकत्वप्रसञ्जनमपि. तत्र प्राणधारणस्य तदनुकूलव्यापारस्या कर्तृमात्रसमवेततया जीवधात्वर्थफलव्यापकव्यापारवाचकताया एव तत्र सत्त्वादिति।

स्वार्थफलसमानाधिकरणव्यापारवाचकत्वस्य स्वनिष्ठाकर्मकत्वस्य विवक्षणे गम्धातौ अकर्मकत्वापत्तिः केवलव्यापारवाचकाकर्मकातावकर्मकत्वानुपपत्तिश्चसम्भवतस्तथापि धातुविशिष्टत्वमेवाकर्मकत्वं निश्चेतव्यं वै० स्वार्थव्यापारवाचकत्व—स्वार्थव्यापारासमानाधिकरणफलसामान्यावाचकत्वैतदुभयसम्बन्धेन, तथा च केवलव्यापारवाचकधातुषु नाकर्मकलक्षणाव्याप्तिर्न वा पचादिष्वतिव्याप्तिस्तत्रस्वार्थव्यापार'समानाधिकरणफलसामान्यावाचकत्वविरहादिति संक्षेपः।

नागेशस्तु—अध्यासिता भूमय इत्यादौ सकर्मकत्वप्रयुक्तकर्मनिष्ठासिद्धये शब्दशास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वं शब्दशास्त्रीयकर्मसंज्ञाकार्थानन्वय्यर्थकत्वञ्चाकर्मत्वमिति सिद्धान्तयतिस्म, यथा ग्रामङ्गच्छतीत्यादिस्थले शब्दशास्त्रीयकर्मसंज्ञकार्थो ग्रामस्तदन्वय्यर्थः संयोगस्तद्वाचकत्वेन तत्र सकर्मकत्वसत्तेति।

एवमध्यासिता भूमय इत्यादेरपि निष्पत्तिर्यतः "अधिशीङ्स्थासां कर्म" इति सूत्रेणाधारस्य भूमेः कर्मसंज्ञाविधानात् कर्मसंज्ञकोऽर्थो भूम्यादिस्तदन्वय्यर्थः संयोगस्तद्वाचकत्वेन तत्रापि सकर्मकत्वव्यवहार उपपद्यते। अन्वयश्च पृथग्बुद्धिविषयेणार्थेनग्राह्यस्तथा च जीवधातोः प्राणधारणानुकूलव्यापारार्थकत्वेऽपि प्राणधारणस्यान्वयितावच्छेदकरूपेण पृथगनुपस्थियतया न जीवधातोः शब्दशास्त्रीयकर्मसंज्ञकत्वेन सम्भावितार्थान्वय्यर्थकत्वरूपं सकर्मकत्वमिति।

न चाधिपूर्वकासुधातुस्थलेऽपि सैव गतिरिति वाच्यं, तत्र धात्वर्थसंयोगस्य फलबलात् पृथग्बुद्धिविषयतायाःस्वीकरणीयत्वादिति संक्षेपः॥

२१—(प्र०) कस्तावज्ज्ञाधात्वर्थः? कथं वा सकर्मकत्वम्? विषयावच्छिन्नावरणभङ्गानुकूलव्यापारस्य धात्वर्थत्वे का क्षतिरितिसर्वं स्पष्टतयापपादयन्तु॥

(उ०) ज्ञाधात्वर्थश्च ज्ञानानुकूलव्यापाराः सचात्ममनःसंयोगात्मकोऽतएव मनोवृत्तिव्यापारविवक्षायां मनोज्ञानातीति सङ्गच्छते। आत्माऽऽत्मानं जानातो-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्यादौ त्वन्तःकरणावच्छिन्नं चैतन्यं कर्तृ, शरीरावच्छिन्नं चैतन्यङ्कर्म, तथाच शरीरावच्छिन्नचैतन्यस्य धात्वर्थतावच्छेदकज्ञानाश्रयतया कर्मत्वं सम्पद्यते।

ननु ज्ञानानुकूलव्यापारस्य धात्वर्थत्वे ज्ञानस्य तदनुकूलव्यापारस्य च समवायसम्बन्धे नात्ममात्रनिष्ठतया स्वार्थफलसमानाधिकरणव्यापारवाचकतया ज्ञाधातोरकर्मकत्वापत्तिरितिचेन्न, विषयतासम्बन्धस्यैव प्रकृतधात्वर्थतावच्छेदकफलतावच्छेदकसम्बन्धत्वेन फलतावच्छेदकविषयतासम्बन्धेन ज्ञानस्य घटादिनिष्ठतया तदनुकूलव्यापारस्य च देवदत्तादिनिष्ठतया फलतावच्छेदकसम्बन्धघटितस्वार्थफलसमानाधिकरणव्यापारवाचकत्वस्याभावात्। न च आत्माऽऽत्मानञ्जानातीति स्थले कर्तृकर्मणोरैक्येन फलतावच्छेदकसम्बन्धेनाऽपि फलव्यापारयोः सामानाधिकरण्यमस्त्येवेति वाच्यम्–अन्तःकरणशरीरोपाध्योर्भिन्नतया तदवच्छिन्नचैतन्योरप्युपाधिदशायाम्भेदोपगमेन फलतावच्छेदकसम्बन्धघटितसामानाधिकरणस्य वक्तुमशक्यत्वात्। फलतावच्छेदकसम्बन्धघटितस्वार्थफलव्यधिकरणव्यापारवाचकत्वात्मकं सकर्मकत्वमपि समूहनीयम्।

विषयावच्छिन्नावरणभङ्गानुकूलव्यापारस्य ज्ञाधात्वर्थत्वे ज्ञाधातोः सकर्मकत्वोपपादनेऽपि "नच कर्तृस्थभावकानां कर्मणि क्रियायाः प्रवृत्तिरस्ति" इति भाष्येण कर्तृस्थभावकानां क्रियाफलस्य कर्ममात्रेवृत्तिर्नास्तीत्यर्थकेन कर्तृकर्मोभयसाधारणफलार्थकत्वं कर्तृस्थभावकत्वं वदतां कर्ममात्रवृत्तिफलार्थकत्वरूपकर्मस्थभावकत्वस्यैवाभ्युपगमेन तन्नावरणभङ्गस्य ज्ञाधात्वर्थतावच्छेदकफलत्वे तस्य कर्ममात्रनिष्ठतया कर्मवद्भावस्यदुर्वारतापत्त्या ज्ञायते घटः स्वयमेवेत्यापत्तेः। ज्ञानस्य ज्ञाधात्वर्थतावच्छेदफलत्वे तु तस्य कर्तृकर्मसाधारण्यान्नकर्मस्थभावकत्वं ज्ञाधातोरतो न कर्मवद्भावः प्रवर्तत इति दिक्।

२२—(प्र०) लकाराणां कृतौ शक्तिर्नतुकर्तरीति तार्किकमतमुपपाद्यतन्मते कर्तृकर्म प्रत्ययस्थलशाब्दबोधम्प्रदर्श्य शाब्दिकसिद्धान्तदिशा चतार्किकमतन्निरस्य च नागेशाभिप्रेतं शाब्दबोधं कर्तृकर्मप्रत्ययस्थलीयंवचन प्रदर्शयन्तु चिरायुषः॥

(उ०) तार्किकाणामयमाशयो यत्नाश्रयस्य कर्तृत्वेन कर्तर्य्याख्यातस्य शक्तौ कर्तृत्वस्य यत्नात्मकस्य शक्यतावच्छेकत्वे गौरवाद्यत्नानामानन्त्यत्, यत्ने आख्यातस्य शक्तिस्वीकारे तु यत्नत्वस्य शक्यतावच्छेदकत्वे तस्य जातितक्येन लाघवात्। पचतीत्यस्य पाकं करोतीति–पच्धातुप्रतिपाद्यस्य पाकशब्देनआख्यातप्रतिपाद्यस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यत्नार्थकेन करोतिना विवरणदर्शनेन विव्रियमाणस्याख्यातस्य यत्नार्थकताया औचित्याच्च । कर्तुः समभिव्याहृतप्रथमान्तपदेन आक्षेपेण वा लाभम्भवाच्चानन्यलभ्ययत्ने एव शक्तिरुपेया । "प्रकृतिप्रत्ययौसहार्थं ब्रूतस्तयोः प्रत्ययार्थः प्रधानमिति" न्यायानुरोधेन प्रत्ययार्थे यत्ने प्रकृत्यर्थोविशेषणम्, प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधश्चाभीष्टस्तथा च चैत्रस्तण्डुलं पचतीति वाक्यात् तण्डुलनिरूपिताऽऽधेयतावद्विक्लित्यनुकूलव्यापारानुकूलकृतिमांश्चैत्र एकत्वविशिष्ट इति बोधः । चैत्रेण पच्यते तण्डुल इति वाक्यतस्त्वेकत्वविशिष्टचैत्रसमवेतकृतिजन्यव्यापारजन्यविक्लित्याश्रयस्तण्डुल इति बोधः ।

किन्तु शाब्दिकास्तावत्तार्किकमतं नाद्रियन्ते तथाहि—शक्तिग्राहकशिरोमणिभूतव्याकरणबोधितायाः कर्तरि लकारशक्तेस्त्यागे नैव कोऽपि हेतुरिति सिंहनादः ।

तथाहि — "लःकर्मणिचभावे चाकर्मकेभ्य" इति सूत्रं कर्तरि लकारशक्तिं ग्राहयति, तत्र हि "कर्तरिकृत्" इति सूत्राच्चकारेण "कर्तरि" इति पदमपकृष्यते, बोधकतारूपां तिबादिशक्तिं तत्स्थानित्वेन कल्पिते लकारे परिकल्प्य लकाराः कर्मणि कर्तरि च तेन विधीयन्ते ।

न च "द्व्येकयोर्द्विवचनैकवचने" इत्यादौ भावप्रधाननिर्देशस्य सूत्रकृच्छैलोसिद्धत्वेन "पक्ता देवदत्त" इत्यादिवाक्येष्वोऽभेदान्वयसिद्धये "कर्तरिकृत्" इत्यत्र कर्तृपरत्वेन क्लृप्तस्यापि कर्तृपदस्योक्तरीत्या लाघवरूपविनिगमनासद्भावेन प्रकृते शब्दाधिकाराश्रयणेन धर्मपरत्वे ऋषिस्वारस्यानुमानेन च न यत्ने शक्तौ स्वीकृतायामपि शक्तिग्राहकं व्याकरणं प्रतिकूलमिति वाच्यं, कर्तरि आख्यातशक्तिस्वीकारेऽपि आश्रयत्वस्य तत्तच्छक्तिविशेषरूपस्याखण्डरूपतां विज्ञाय तत्र शक्यतावच्छेदकत्वे गौरवाभावेन तथा वक्तुमशक्यत्वात् ।

"रथो गच्छति" 'देवदत्तो जानाती'त्यादौ चाख्यातस्याऽऽश्रये लक्षणायाम् आश्रयत्वे लक्ष्यतावच्छेदकत्वस्येव शक्यतावच्छेदकत्वस्य गुरुधर्मे स्वीकारे बाधकाभावाच्च, शब्दाधिकारस्यानेकशक्तिकल्पना दूषितत्वेन गौरवग्रस्तत्वाच्च, "अतो गुणे" इत्यतोऽतइत्यनुवृत्त्यैव सिद्धेः "अव्यक्तानुकरणस्यात" इति सूत्रेऽत इति करणेन शब्दाधिकारस्य प्रमाणसापेक्षत्वसूचनाच्च, "ष्णान्ता षट्" सूत्रभाष्ये "नचान्यार्थं प्रकृतमनुवर्तनादन्यद्भवति, "नहि गोधा सर्पन्ती सर्पणादहिर्भवति" इत्युक्त्या शब्दाधिकारस्यावहेलनाच्च ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

किञ्च "पक्ता देवदत्त" इत्यादावभेदान्वयानुरोधेन कृत्प्रत्ययस्य कर्तरि शक्तिरिव "पचति रूपं देवदत्तः" इत्यादावप्यभेदान्वयानुरोधेन तिङोऽपि कर्तरि शक्तिस्वीकारस्यावश्यकत्वाच्च।

युक्तश्चैतदन्यथाऽर्थमात्रालाघवेनाऽपि पुत्रोत्सवं मन्यमानो भगवान् पाणिनिः कर्तरीत्युक्तावपि "लः कर्मणि" इत्यत्र कर्तृत्वे लक्षणाया गलेपतितत्वेन "स्वायत्ते शब्दप्रयोगे किमित्यवाचकं प्रयुञ्ज्महे" इतिन्यायविरोधस्य दुर्वारत्वेन 'कर्तरि कृत्" इत्यत्रैव मात्रालाघवानुगृहीतामाश्रये लक्षणामभिप्रेत्य "कर्तरि" इति स्थाने कृताविर्त्येवब्रूयात्? किन्तु तथाऽकथनेन स्पष्टमेवाऽऽख्यातस्य कर्तरि शक्तौ स्वारस्यानुमानञ्जायते।

अथ च कथञ्चिच्छन्दाधिकारमाश्रित्यापि लकाराणां कृतिवाचकत्वं न वक्तुं शक्यते तथाहि—"पचन्तं चैत्रं पश्य 'पचते चैत्राय देही'"त्यादौ तिबादिवल्लादेशाविशेषेण तेभ्योऽपि कृतिमात्रबोधापत्तेः। नचेष्टापत्तिः, तत्राभेदसंसर्गस्यैव वाच्यतया कर्तृवाचकताया एवागत्या तार्किकैरप्यभ्युपगन्तव्यत्वात्, नामार्थयोरभेदातिरिक्तसंसर्गस्याव्युत्पन्नत्वात्। नचातएव शत्रादीनां कर्तरि शक्तिः, तिबादीनां कृतावेव शक्तिरितिवैषम्यं सह्यत इति वाच्यं, तार्किकमते स्थानिन एव वाचकत्वस्य लाघवेन स्वीकारादादेशानां वाचकत्वे तेषां, स्थान्यपेक्षया बहुत्वेन गौरवापत्तेः, अतएव राम इत्यादौ सुत्वेनैकत्वे शक्तिरिति व्यवहारः, एवं स्थिते तिबादीनां शत्रादीनांश्च स्मारकतया बोधकतायाश्च लकारे एव स्वीकर्तव्यतया शत्राद्यन्ते कर्तरिशक्तत्वे तिङन्ते च कृतिबोधकत्वे "अन्यायश्चानेकार्थत्वमि"ति न्यायापत्तेः।

किञ्च यत्नस्यापि व्यापारविशेषरूपतया धातुनैव लाभसम्भवात्तत्राख्यातस्य शक्तिकल्पनमयुक्तम् "अनन्यलभ्यो हि शब्दार्थः" इति न्यायात्।

नच सत्यपि गौरवे पचतीत्यस्य पाकं करोतीति विवरणानुरोधेनाऽऽख्यातस्य कृतिवाचकत्वमङ्गीक्रियत इति वाच्यं, करोतेर्यत्नार्थकताया एवासिद्धेः। कथमन्यथा "रथो गमनङ्करोति" "बीजेनाङ्कुरः कृतः" इत्याद्युपद्येत? अचेतने रथादौ कृतेर्बाधात्।

किञ्चैवं जानातेरिव करोतेरपि कर्तृस्थभावकत्वापत्त्याऽविशेषेण कर्मस्थभावकत्वानुपपत्त्या "ज्ञायते घटः स्वयमेवे"तिवत् "क्रियते घटः स्वयमेवेत्यस्यापि विलयङ्गतत्वापत्तेरतो लकाराणां कर्तर्य्येव शक्तिरास्थेया नतु कृताविति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नागेशस्तावत् कर्तृप्रत्ययस्थले व्यापारमुख्यविशेष्यकशाब्दबोधं कर्मप्रत्ययस्थले च फलमुख्यविशेष्यकशाब्दबोधम्मनुते, तन्मते "सुप आत्मनः क्यच्" इति सूत्रस्थभाष्यानुरोधेन विशेष्यविशेषणभावस्य व्यत्यासः सम्भवति, कर्तृप्रत्ययस्थले चैत्रस्तण्डुलम्पचतीतिवाक्यदेकत्वाश्रयतण्डुलाभिन्नाश्रयवृत्तिविक्लित्यनुकूलव्यापारो वर्तमानकालावच्छिन्न एकत्वविशिष्टचैत्राऽभिन्नाश्रयवृत्तिरिति बोधः,

कर्मप्रत्ययस्थले च चैत्रेण पच्यते तण्डुल इत्यतः एकत्वविशिष्टचैत्राऽभिन्नाश्रयवृत्तिवर्तमानकालिकव्यापारजन्या एकत्वविशिष्टण्डुलाऽभिन्नाश्रयवृत्तिविक्लित्तिरिति-बोधः।

२३—(प्र०) आख्यातार्थे धात्वर्थो विशेषणमिति सयुक्तिकं विविच्यनिराक्रियताम्।

(उ०) तार्किकाणामयमाशयः—'प्रकृत्यर्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नंप्रति मुख्यविशेष्यतासम्बन्धेन प्रत्ययजन्योपस्थितिः कारणमि"ति कार्य्यकारणभावप्रतिफलितेन "प्रकृत्यर्थप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमि"ति सामान्यनियमेन "पाचक" "औपगव" इत्यादौ ण्वुल्-अण् प्रत्ययार्थयोरेव प्रधानतया 'विक्लित्यनुकूलव्यापाराश्रय" उपगुसम्बन्ध्यभिन्नापत्यमितिशाब्दबोधयोर्दर्शनाद्, देवदत्तः तण्डुलं पचतीतिवाक्येभ्योऽपि धात्वर्थप्रकारकतिङर्थकृतिविशेष्यकबोध एवाऽभिलषणीयः,

अजाप्रभृतिषु स्त्रीत्वस्य विशेषणतया भानेऽपि न काचन क्षतिस्तस्य टाबादिद्योत्यतया वाच्यत्वाभावेन तत्रानियमानात्।

किन्त्वत्र ब्रूमो नहि कश्चन सामान्यनियममादायैव व्यवहार उपपादनीयस्तथासति विशेषनियमस्य निरवकाशतया वैयर्थ्यापत्तेः, तथा च प्राक्तननियमस्य सत्त्वेऽपि तस्योत्सर्गतया तदपवादभूतेन "भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि" ति यास्कवचनेन तिङन्तस्थले भावनानिष्ठप्राधान्यस्यैवागन्तव्यत्वात्,

भूवादिसूत्रस्थक्रियाप्राधान्यबोधकभाष्यादपि तिङन्तस्थले भावप्राधान्यस्यैव निश्चेतव्यत्वादन्यथा तत्रत्यभाष्यासङ्गत्यापत्तेस्तथाहि "का तर्हीयं वाचोयुक्तिः पचति भवति त्वं पचसि भवसि, यक्ष्यति भवतीति। सैषा वाचोयुक्तिः। पचादिक्रिया भवतिक्रियायाः कर्त्र्यो भवन्तीति भाष्यं तेन स्पष्टमेव पचाद्यर्थक्रियाकर्तृकभवनक्रियायाः प्राधान्यम्प्रतिपाद्यते, धात्वर्थक्रियाया आख्यातार्थविशेषणत्वाभ्युपगमे तु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भवत्यर्थंक्रियायामाख्यातार्थंविशेषणपचादिक्रियाणामन्वयासम्भवेन तद्विरोधोदुर्वार एवस्यात्। अत एव आख्यातपदेन तिङ्मात्रमादाय 'भावस्य प्रधानमि'ति षष्ठीतत्पुरुषमाश्रित्य प्रत्ययार्थंप्राधान्यमेव प्रतिफलतीति समाधानमप्यश्रद्धेयमेव, विशेषनियमस्य मर्य्यादोल्लङ्घनापत्तेः, आख्यातपदेन "आख्यातमाख्यातेन क्रियासातत्ये" इति सूत्रे तिङन्तस्य ग्रहणाद् भावप्रधानमितिप्रयोगे बहुव्रीह्याश्रयणस्यैव युक्तत्वाच्चाधिकमन्यत्रस्पष्टमिति दिक्।

२—(प्र० प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधं सयुक्तिकं निराकृत्य कर्तृ प्रत्ययस्थले व्यापारमुख्यविशेष्यकशाब्दबोध उपपादनीयः॥

(उ०) तार्किकाणाम्मते धात्वर्थस्याख्यातार्थे विशेषणताऽऽख्यातार्थस्य च विद्यमानप्रथमान्तार्थे आक्षिप्तप्रथमान्तार्थे वाऽन्वयस्तथा च पश्यमृगोधावतीतिवाक्यतोऽन्यदेशसंयोगानुकूलधावनानुकूलकृतिमन्मृगकर्मकं प्रेरणाविषयीभूतं यद्दर्शनं तदनुकूलकृतिमांस्त्वमिति शाब्दबोधः।

किन्त्वेतन्मतेऽन्तरङ्गाद्रुपजीव्यादपि प्रधानाकार्यंबलवत्तायाः 'हेतुमतिचे''ति सूत्रे प्रतिपादनेन तत्र विशेष्यभूतार्थंवाचकमृगशब्दस्य प्रातिपदिकत्वाद् दृशिक्रियाकर्मंवाचकत्वाच्च द्वितीयापत्तौ धावन्तं मृगं पश्येतिवत् पश्यमृगन्धावतीत्यापत्तेः, अप्रथमान्तसामानाधिकरण्ये सति शतृशानचोर्नित्यतयैवंविधप्रयोगस्यैव विलयापत्तेश्च।

नच वाक्यार्थभूतधावनानुकूलव्यापारानुकूलकृतिविशिष्टमृगस्य दर्शनकर्मतयाऽन्वयेन तद्बोधकस्य च वाक्यतया प्रातिपदिकत्वाभावेन न द्वितीयाप्रसक्तिरथवा मृगस्य पूर्वं धावतीत्यनेनान्वयेन "तिङ्समानाधिकरणे प्रथमा" इति वार्तिकात् प्रथमाया उपपत्तौ पश्चाद्दृशधात्वर्थेन मृगस्यान्वयेऽपि नद्वितीया प्रत्ययान्तत्वेनाऽप्रातिपदिकत्वादिति वाच्यम्, उत्कटधावनकर्मकदर्शनप्रतिपिपादयिषयैव "पश्यमृगोधावति" इति प्रयोगकरणेन तद्विरोधापत्तेः, सुबन्तार्थस्य कर्मत्वादिना क्रियायामन्वये निराकांक्षत्वाच्च। अन्यथा "घटः" इति परिनिष्ठतत्वे तदर्थस्य कर्मतयाऽन्वयेऽप्यप्रातिपदिकत्वाद्द्वितीयाया अप्रसक्तौ घटः पश्यतीति प्रयोगपत्तेः।

नाऽपि कृतौ विशेषणस्य धावनस्य दर्शनक्रियायामन्वयो विधातुं शक्यते, एकत्र विशेषणतयाऽन्वितस्यापरत्रविशेषणत्वायोगात्। नाऽपि तमित्यध्याहृत्यान्वयः समुपपादनीयस्तथासति वाक्यभेदापत्तौ भाष्यसिद्धैकवाक्यताभङ्गापत्तेः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

किञ्च विशिष्टस्य कर्मतयाऽन्वयाभ्युपगमे—

कूजन्तं रामरामेति मधुरं मधुराक्षरम्।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्॥

इत्यादावपि मधुरमधुराक्षराऽमिन्नरामरामेतिकूजनकर्तृत्वविशिष्टवाल्मीकिपदार्थस्य वन्दने तुल्ययुक्त्याऽन्वये पश्यमृगोधावतीतिवद् द्वितीयाया अनापत्तेः, किञ्चैवं 'नीलोघटः करोती'ति वाक्यस्यापि प्रामाण्यापत्तेः।

नच दृश्धातोरेव धावनकर्तृत्वविशिष्टमृगकर्मकदर्शने लक्षणाऽन्यपदानि च तात्पर्यग्राहकाणीतिवाच्यं, तात्पर्यानुपपत्तौ सत्यामेव लक्षणास्वीकारात्।

अतस्तार्किकमते "अनभिहित" इत्यधिकारसूत्रीयाभिधानञ्च तिङ्कृत्तद्धितसमासैरित्येतत्प्रत्याख्यानपरभाष्यरीत्या द्वितीयापत्तिर्वज्रलिप्तैव विज्ञायतां, तथापि—कटं भीष्मं कुर्वित्यत्र विशेष्यवाचककटशब्दादुत्पन्नद्वितीयया कर्मत्वस्योक्तत्वाद् विशेषणवाचकभीष्मशब्दाद् द्वितीया न स्यादतः कृत्तद्धितसमासस्थलेष्वेव परिगणितम्, अनन्तरञ्च सर्वकारकपदार्थानां साक्षात्परम्परया वाऽरुणाधिकरणान्यायेन भावनान्वयमाकलय्य कटनिष्ठकर्मत्वोक्तावपि भीष्मत्वादिगुणविशिष्टकटनिष्ठकर्मत्वस्यानुक्ततया तस्माद्द्वितीया स्यादेवेति विभाव्य तत् प्रत्याख्यातं, तथा च प्रकृतेऽपि धावनपदार्थस्यमृगस्य च दर्शनक्रियाकर्मत्वस्यावश्यकतया धावतीत्यस्य प्रातिपदिकत्वाभावाद् विशेषणत्वेनान्यत्र निराकांक्षत्वाच्च द्वितीयोत्पत्त्यभावेऽपि मृगशब्दाद्द्वितीयपात्तिर्दुर्वारैव स्यात्।

शाब्दिकमते तु पश्यमृगोधावतीत्यत्र मृगकर्तृकं धावनं दृशिक्रियायाः कर्म, प्रधानं तु दृशिक्रियैव, तथाच विशेष्यभूतधावनरूपार्थवाचकस्य धावतीत्यस्य प्रातिपदिकत्वाभावान्नद्वितीयाऽतो व्यापारमुख्यविशेष्यकशाब्दबोध एवादरणीयो मृगकर्तृकधावनकर्मकं प्रेरणाविषयीभूतं त्वत्कर्तृकदर्शनमित्याकारक इति दिक्।

२५—(प्र०) निपातनां द्योतकत्वं वाचकत्वं वेति सयुक्तिकं सप्रमाणञ्च विविच्य शाब्दिकसिद्धान्तपक्षो युक्तिप्रमाणाभ्यां व्यवस्थापनीयः॥

(उ०) शाब्दिकानामयमाशयः सुखमनुभवतीत्यत्र प्रतीयमानोऽनुभवार्थो न धात्वर्थः, तथासति "भवति" इतिमात्रप्रयोगेणापि अनुभवार्थप्रतीत्यापत्तेः, नवोपसर्गार्थः, तथासत्यनुभवार्थस्याप्रकृत्यर्थतया तत्राख्यातार्थानन्वयापत्तेः, प्रत्ययानां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रकृत्यर्थान्वितस्वार्थबोधजनकत्वात्, अनुगच्छतीत्यादावप्यनुरूपोपसर्गस्य विद्यमानतया ततोऽप्यनुभवार्थस्य प्रतीत्यापत्तेश्च। अतोऽगत्याभूधातोरेवानुभवार्थेऽप्रसिद्धाशक्तिरस्तीति निर्धार्यतां तात्पर्य्यग्राहकत्वेन चानुरूपोपसर्गस्य द्योतकत्वं मन्यताम्।

तथा चानुभवरूपफलस्य धात्वर्थतावच्छेदकतया फलतावच्छेदकसम्बन्धेन स्वार्थफलव्यधिकरणव्यापारवाचकत्वेन सकर्मकता कर्मणिप्रत्यये "अनुभूयते सुखमिति" प्रयोगोऽपीष्टः सम्पद्यते। अनेनैव पथा साक्षात्काररूपम्फलमुपासनारूपञ्च फलं क्रमशः कृञ्-आस्धात्वोर्विज्ञाय 'साक्षात् क्रियते गुरुः' उपास्यते हरिरि'त्यादि प्रयोगाः कर्मणि सम्पादनीयाः। शब्दशास्त्रीयकर्मसंज्ञकार्थान्वियर्थकत्वं सकर्मकत्वमिति सिद्धान्तपक्षेऽपि कर्मसंज्ञकार्थान्वयित्वेनानुभवसाक्षात्कारोपासनादेर्धात्वर्थत्वमेव मन्तव्यमन्यथा तत्तद्धातूनां सकर्मकत्वमे न स्यात्। अनुसाक्षात्प्रभृतीनां प्रकृते द्योतकत्वं स्वसमभिव्याहृतपद (धातु) निष्ठशक्त्युद्बोधकत्वमेव। "प्रादेशं विलिखति" 'अथशब्दानुशासनमि" त्यादौ क्रमशः विमान-प्रारम्भक्रियाक्षेपकतयैव वि-अथेत्यनयोर्दर्शनात्तत्र द्योतकत्वं क्रियाविशेषाक्षेपकत्वं क्रियाविशेषाक्षेपकत्वमेवावगन्तव्यम्।

'जपमनुप्रावर्षदि''त्यादौ अनुप्रभृतेर्द्योतकत्वन्तु सम्बन्धपरिच्छेदकत्वात्मकमेव। तथाच द्योतकत्वस्य नानात्मकत्वेऽपि न क्षतिः।

तत्र तार्किकाः समादधते-उपासनासाक्षात्कारादिर्निपातार्थ एवाऽस्तु''साक्षात्प्रत्यक्षतुल्ययोरिति कोशस्वरसात्, तदनुकूलव्यापारश्चधात्वर्थः। नच तथा सति धातोः सकर्मकत्वानुपपत्तिरिति वाच्यं स्वस्वसमाभिव्याहृतनिपातान्यतरार्थफलव्यधिकरण व्यापारवाचत्वात्मकसर्मकत्वाभ्युपगमेन तत्तद्धातूनां सकर्मकत्वस्याक्षतत्वादिति।

किन्तु— तथासति नामार्थधात्वार्थयोः साक्षादभेदसम्बन्धेनान्वयस्याव्युत्पन्नतयानिपातार्थफलधात्वर्थव्यापारयोः परस्परमन्वयस्यैवासम्भवापत्तेः। निपातातिरिक्तनामार्थधात्वर्थयोः साक्षादभेदान्वयस्याव्युत्पन्नत्वस्वीकारेऽपि निपातार्थफलाश्रयत्वेऽपि धात्वर्थान्वयं विना कर्मत्वानुपपत्तेस्तादवस्थ्यापत्तेः।

अथ च निपातानां वाचकत्वे यथा"भूयान् प्रकर्षः" "कीदृशो निश्चय" इत्यादि प्रयोगो भवति तथैव 'भूयान्प्र' 'कीदृशोनिरि' तिप्रभृतिप्रयोगस्याप्यापत्तेः, अतः प्रादेः स्वतो निरर्थकत्वं विज्ञाय द्योतकत्वमेवादर्तव्यं, तत्समाधानान्तरमस्तीतित्वन्यत्। नच निपातानां द्योतकत्वे स्वतोऽर्थवाचकत्वाभावार्थवत्त्वप्रयुक्तप्रातिपदिक-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संज्ञाया अप्रवृत्त्या स्वाद्यनुत्पत्तौ पदत्वप्रयुक्तकार्य्यं तत्समभिव्याहारे न स्यादिति वाच्यं, शक्तिलक्षणाद्योतकताऽन्यतमसम्बन्धेनार्थवाचकत्वस्यैवार्थवत्त्वपदार्थतया तत्राप्येतादृशार्थवत्त्वस्य सौलभ्यात्। नञ्समासे उत्तरपदार्थप्राधान्यव्यवहारस्तु द्योत्यार्थमपेक्ष्यैव सम्पादनीयः।

अत एव धातूपसर्गयोः परस्परसमभिव्याहारे प्रतीयमानार्थपूर्वमेवाभ्यान्तरीकृत्यकेवलधातोः पूर्वं साधनादिकार्य्ये कृते पश्चात् तादृशार्थसम्पादनायोपसर्गस'भव्याहारः सम्पाद्यत इत्येवाऽभिप्रायमासाद्य पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति भाष्येसिद्धान्तितम्।

भर्तृहरिरपि—

धातोः साधनयोगस्य भाविनः प्रक्रमाद्यथा।
धातुत्वं कर्मभावश्च तथान्यदपि दृश्यताम्॥
बुद्धिस्थादभिसम्बन्धात्तथा धातूपसर्गयोः।
अभ्यन्तरीकृतोभेदः पदकाले प्रकाशते॥

इत्युभयकारिकाभ्याम् उपसर्गसम्बन्धात् उपसर्गद्योत्यार्थविशिष्टस्वार्थबोधकत्वं धातूनां सिद्धान्तयति।

अतो धातूनामनेकार्थत्वस्य सर्वसम्मततया धातुभ्य एव"प्रजपति प्रणमती"त्यादि प्रयोगघटकीभूतेभ्यः प्रकर्षविशिष्टजपनत्योः प्रतीतिनिर्वाहे प्रशब्दादेः पृथक् तत्तदर्थनिरूपितशक्तिकल्पनस्य गौरवपराहततया अनेकार्थकशब्दादेकार्थस्यैव प्रतीतौ 'तात्पर्य्यग्राहकस्यावश्यमपेक्षणीयतया प्रशब्दादेस्तात्पर्य्यग्राहकतया द्योतकत्वमेव सिद्धान्तितव्यं, न तुप्रशब्दादेः प्रकर्षाद्यर्थवाचकत्वमङ्गीकार्यं, तथा सति धात्वसमिव्याहारेऽपि ततः प्रकर्षादिप्रतीत्यापत्तेः, तदीयशक्याभावेन तत्र लक्षणाया अप्यसम्भवाच्चेति दिक्।

२६-(प्र०) चन्द्र इव मुखमित्यादौ लक्षणाऽनङ्गीकारेऽप्रसिद्धाशक्त्यनङ्गीकारेवा किंदूषणमुपन्यस्तं नागेशेन कश्च तत्र सिद्धान्तः प्रदर्शितः कीदृशश्च धर्मः सादृश्यनियामक इति निपुणतयोपपादयन्तु:।

(उ०) नागेशस्यायमाशयः—इवशब्दस्य स्वसभिव्याहृतपदनिष्ठाऽर्थान्तरशक्तिद्योतकत्वेन स्वतः किञ्चिदर्थवाचकत्वाभावात् "नञिवयुक्तमन्यसदृशाऽधिकरणे तथा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ह्यर्थगतिरिति' न्यायमनुरुध्य नञ्समभिव्याहृतेवसमभिव्याहृतपदयोः स्वप्रतिपाद्यार्थ-सादृश्य–स्वप्रतिपाद्यार्थभिन्नत्वोभयसम्बन्धेन स्वविशिष्टार्थबोधकताया निश्चेतव्यत्वात्, प्रकृते चन्द्रइवमुखमित्यत्रेवशब्दसमभिव्याहृतचन्द्रशब्दस्य स्वप्रतिपाद्यार्थचन्द्रप्रतियोगिकसादृश्यानुयोगिनि स्वार्थभिन्नेऽर्थे लक्षणाऽप्रसिद्धा । शक्तिर्वा विज्ञातव्या । तथा च चन्द्रइवमुखमिति वाक्यतश्चन्द्रभिन्नचन्द्रप्रतियोगिकसादृश्यानुयोग्यभिन्नम् मुखमिति संक्षिप्तबोधः ।

साद‍ृश्यनियामकधर्मश्च सादृश्यप्रतियोगितावच्छेदकव्यापको ग्राह्यः, सच प्रकृते आह्लादजनकत्वात्मकः, यतस्तस्य चन्द्रमुखोभयसाधारण्येन सादृश्यप्रतियोगितावच्छेदकचन्द्रत्वव्यापकत्वात् ।

न च सादृश्यप्रतियोगितावच्छेदकधर्मव्यापकधर्मेण सादृश्यबोधनेऽपि "चन्द्रइवचन्द्र" इति प्रयोगापत्तिस्तदवस्थैव चन्द्रत्वेन सादृश्यसम्भवात् तस्यच सादृश्यप्रतियोगितावच्छेदकचन्द्रत्वव्यापकत्वादिति वाच्यं, तथासति सादृश्यप्रतियोगितावच्छेदकविशिष्टधर्मेण सादृश्यस्य ग्राह्यत्वात्, वै० स्वव्यापकत्व-स्वभिन्नत्व-स्वव्यापकाव्यापकत्वैतत्त्रितत्त्रितयसम्बन्धेन, तथाच न चन्द्रत्वेन परस्परं स्वस्मिन् सादृश्यं, तस्य सादृश्यप्रतियोगितावच्छेदक चन्द्रत्वभिन्नत्वविरहात्, स्वव्यापकाव्यापकत्ववशिष्टनिवेशान्न केवलान्वयिप्रमेयत्वादिधर्मेण सादृश्यमिति । इवशब्दस्यैव सादृश्यार्थवाचकत्वं, सादृश्ये च चन्द्रपदार्थस्य स्वनिष्ठप्रतियोगितात्वसम्बन्धेनान्वयः, सादृश्यपदार्थस्य चानुयोगित्वसम्बन्धेन मुखेऽन्वयस्तथा च चन्द्रप्रतियोगिकसादृश्यानुयोगिमुखमिति बोधस्य चन्द्रशब्दस्य लक्षणां विनाऽपि लाभेन किमर्थं लक्षणाविधानविडम्बनमिति वाच्यं, तथासति "चन्द्रमिव मुखं पश्यामि" इत्यादौ चन्द्रपदस्य मुखरूपकर्मसामानाधिकरण्याभावात् कर्मणि कर्तरि च लकारेऽपि चन्द्रशब्दान्मुखशब्दादिव प्रथमाद्वितीये न स्यातां, किन्त्विवार्थसादृश्ये भेदसम्बन्धेन चन्दपदार्थान्वयात् ततः षष्ठ्यापत्तेः, इवशब्दस्य द्योतकत्वेतु चन्द्रपदार्थस्य चन्द्रप्रतियोगिकसादृश्यानुयोगिनि मुखेऽभेदसम्बन्धेनान्वयादसति बाधके विशेषणवाचक पदस्य विशेष्यवाचकपदोत्तरविभक्तिसमानविभक्तिकत्वनियमस्याऽभेदान्वयबोधस्थले आवश्यकतया सर्वापत्तिवारणात् ।

वस्तुत इवशब्दस्योपमानताद्योतकतैव समुचिता, उपमानता चोपमानोतमेयनिष्ठासाधारणधर्मवत्त्वेन स्वल्पभेदवत्त्वपरिच्छेदकता, उपमेयता चोपमानोपमेयासाधारणधर्मत्वे न परिच्छेद्यता, उभयसाधारणासाधारणधर्मसम्बन्धश्च क्वचिद्विशेष्य-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तया क्वचित् विशेषणतयाऽन्वेति तथाच चन्द्रइवऽऽह्लादकं मुखमित्यादित आह्लादकं मुखमित्यादित आह्लादकोपमानभूतचन्द्राऽभिन्नाऽऽह्लादकम्मुखमित्यादिबोधः। "चन्द्रइवमुखमाह्लादयती"ति वाक्यात्तूपमानभूतचन्द्रकर्तृकाह्लादाऽभिन्नाह्लादो मुखकर्तृक इतिसंक्षिप्तबोध इति दिक्।

२७—(प्र०) घटोनपट इत्यत्र घटपदं घटप्रतियोगिताके लाक्षणिकं नञ्पदं तु भेदवतीति तार्किकमतं निरस्य स्वसिद्धान्तमत्रोपपाद्य चैवकारार्थान् सोदाहरणान् स्पष्टीकुर्वताम्।

(उ०) नैयायिकानामयमाशयो घटपदस्य स्ववृत्तिघटत्वावच्छिन्नप्रतियोगिताके, नञ्पदस्य च भेदाश्रये, नञ्पदार्थैदेशेभेदेऽभेदसम्बन्धेन घटपदार्थस्य घटत्वावच्छिन्नप्रतियोगिताकस्यान्वयः, 'नञर्थस्य भेदाश्रयस्य चाभेदसम्बन्धेन पटेऽन्वयस्तथा च घटत्वावच्छिन्नप्रतियोगिताकाऽभिन्नभेदाश्रयाऽभिन्नःपट इति शाब्दबोधः सम्पद्यते, किन्त्वेतादृशलक्षणास्वीकारे नञर्थतावच्छेदकस्य भेदस्य नञ्पदार्थैकदेशतया तत्र घटपदार्थस्य घटत्वावच्छिन्नप्रतियोगिता कस्याऽभेदसम्बन्धेनान्वयो न स्याद्, यतस्तत्तदभिन्नपदप्रयोज्यार्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नंप्रति तत्पदजन्योपस्थितिर्मुख्यविशेष्यता सम्बन्धेन कारणमिति कार्य्यकारणभावमूलिकायाः 'पदार्थः पदार्थेनान्वेति नतु पदार्थैकदेशेने"ति व्युत्पत्तेर्विरोधापत्तेः। नच देवदत्तस्य गुरुकुलम् "चैत्रस्यदासभार्येत्यादौ पदार्थैकदेशे गुरुत्वादौ देवदत्तनिरूपितत्वादेरन्वयदर्शनान्नित्यसाकांक्षस्थलीयसङ्कोचस्यावश्यकतया प्रकृतेऽपि सङ्कोचेन काचन क्षतिरिति वाच्यं, तथापि पदद्वयेलक्षणाद्वयगौरवस्य तादवस्थ्यात्। अतो नञ्समभिव्याहृतघटपदस्य घटप्रतियोगिकभेदाश्रयेऽप्रसिद्धाशक्तिरेव विज्ञायतां नञ्पदञ्च तादृशाप्रसिद्धार्थनिरूपितशक्तितात्पर्य्यग्राहकमिति मन्यतामिति।

"एवचानियोगे":इति वार्तिकमुपादाय भाष्यकृताऽभिहितेन—

"अनवक्लृप्तौ यदा दृष्टः पररूपस्य गोचरः।
"एवस्तु विषयो वृद्धेर्नियमेऽयं यदाभवेत्"॥

इति श्लोकेनैव शब्दद्योत्यार्थोऽवधारणात्मकः संशयात्मकश्च प्रतीयते, क्वचिदन्यादृशोऽपि प्रतीयत इति त्वन्यत्, तत्रावधारणं त्रिविधं विशेष्यतसङ्गतैवकारेऽन्ययोगव्यवच्छेदरूपं, विशेषणसङ्गतैवकारेऽयोगव्यवच्छेदरूपं, क्रियासङ्गतैवकारेऽत्यन्ता-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

योगव्यवच्छेदरूपं, यथा "पार्थ एव धनुर्धर" इत्यत्र—विशेष्यसङ्गतैवकारेणान्ययोग-व्यवच्छेदरूपमवधारणमवगम्यते, तथाहि अन्यो विशेष्यपदार्थापेक्षया भिन्नस्तस्मिन् यो योगः विशेष्यवाचकपदसमभिव्याहृतपदार्थतावच्छेदकस्यसम्बन्धस्तस्य व्यवच्छेदो बोध्यतेऽर्थाद् विशेष्यपदार्थातिरिक्ते तत्समभिव्याहृतपदार्थतावच्छेदकात्यन्ताभावो बोध्यते, तथा च "पार्थ एवधनुर्धर" इति वाक्यात् पार्थत्वावच्छिन्नप्रतियोगितानिरूपकभेदाश्रय (पदार्थान्तर) निरूपितवृत्तित्वाभाववद्धनुर्धरत्वं तादृशधनुर्धरत्ववात् पार्थ (अर्जुनः) इति बोधः। विशेषणसङ्गतैवकारेणाऽयोगव्यवच्छेदमवधारणं द्योत्यते, यथा शङ्खः पाण्डुरेवेत्यत्र, तथाहि—अयोगः-एवशब्दसमभिव्याहृतपदार्थतावच्छेदक-सम्बन्धाभावस्तद्व्यवच्छेदस्तदत्यन्ताभावोऽर्थादत्यन्ताभावसामान्याभावस्य प्रतियोगि-रूपतया नञ्द्वयस्य प्रकृतार्थदाढर्यबोधकतया च एवशब्दस्यसमभिव्याहृतपदार्थताव-च्छेदकसम्बन्धस्य समभिव्याहृतपदार्थेऽतिशयेन सत्वं प्रतीयते सतश्च—'शङ्खःपाण्डु-रेवे'—तिवाक्याद् अव्यभिचरितपाण्डुत्वगुणवदभिन्नः शङ्ख इति शाब्दबोधः पर्यवस्यति।

क्रियासङ्गतैवकारेण चात्यन्तायोगव्यवच्छेदरूपमवधारणं द्योत्यते, यथा नीलं 'सरोजं भवत्येवेत्यत्र, तथाहि—अत्यन्तायोग एवशब्दसमभिव्याहृतपदार्थतावच्छेदक-स्यातिशयेन सम्बन्धाभावस्तस्य व्यवच्छेदोऽर्थाद् एवशब्दस्य समभिव्याहृतपदार्थताव-च्छेदकसम्बन्धस्य, एवशब्दसमभिव्याहृतपदार्थतावच्छेदकसमानाधिकरण्येन बोधनं, तथाच—नीलं सरोजं भवत्येवेति वाक्यात्—(सरोजत्वसामानाधिकरण्येन) अर्था-च्छुद्धसमवायसंम्बन्धेन नील गुणवदभिन्नं यत्सरोजं तत्कर्तृकं भवनमिति संक्षिप्त-शाब्दबोध इति दिक्।

२८—(प्र०) "विधिरत्यन्त्यमप्राप्तौ नियमः पाक्षिकेसति। तत्र चाऽन्यत्र च प्राप्तौ परिसख्येति गीयते" इति कारिका नागेशेन कथमवतारितेति प्रदर्श्य व्याख्याय च नियमपरिसंख्ययोः के त्रयो दोषाः ? तयोश्च को भेदः ? इयि सर्वं स्पष्टतया निरूपयन्तु।

(उ०) एवकारार्थनिरूपणावसरे एवशब्दं विनाऽपि तदर्थनियमप्रतीतिरित द्रढयितुं भागवतश्लोकाः—

लोके व्यवायाऽऽमिषमद्यसेवा, नित्यास्तु जन्तोर्नहि तत्र चोदना ॥
व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इत्यात्मकोऽवतारियोग्रन्थकृता। तत्र च मैथुनमत्स्यादिमद्यसेवनस्य-प्राणिनां रागतो नित्यप्राप्ततया नैतेषां नियमविधित्वं, किन्तु-प्राप्तस्याप्यर्थस्य पुनः प्रापणमनर्थकमित्यपूर्वविधिद्वाराऽन्यनिवृत्तिः प्रतिफलति-तथाहि "ऋतौ भार्यामुपेयात्" "हुतशेषं-भक्षयेत्" "सौत्रामण्यां सुराग्रहान् गृह्णाति" इत्येतेषाँ वैयर्थ्यंमिया ऋतौ भार्यागमनस्य हुतशेषमांसादिकर्मकभक्षणस्य सौत्रामणियोगाधिकरणकसुराग्रहस्य चावश्यकर्तव्यतां सम्पाद्यान्यत्र तेषां निवृत्तिर्बोधिता।

तत्र विधिप्रसङ्गमासाद्येयं कारिकाऽवतारिता, तत्रापूर्वविधित्वं तावत् कालत्रयेऽपि कथमपि केनाऽप्यप्राप्तस्य प्राप्तिबोधनफलकविधित्वं यथा 'स्वर्गकामोऽश्वमेधेन यजेते'ति विधेरश्वमेधकरणकयागधर्मिकस्वर्गफलकत्वबोधनस्य कथमपि केनाऽपि मानान्तरेणाप्राप्तस्य विधानादपूर्वत्वम्। नियमविधित्वं तावत् पक्षप्राप्तस्याप्राप्तांशपरिपूरणफलकविधित्वं, तथा, "व्रीहीनवहन्ती"ति तत्र विध्यभावेऽपि पुरोडाशप्रकृतिद्रव्याणां व्रीहीणां तण्डुलनिष्पत्त्याऽऽक्षेपादेवावहननप्राप्तिर्भविष्यति न तु तत्प्राप्त्यर्थोऽयं विधिः, किन्त्वाक्षेपादवहननप्राप्तिवत्, लोकावगतकारणत्वाऽविशेषान्नखविदलनादिरपि पक्षे प्राप्नुयादित्युवहननाप्राप्तांशस्य पाक्षिकात्वसम्भवात्तदंशपरिपूरणफलकत्वम्, अवघातनिष्पन्नतण्डुलकृतपुरो-डाशसिद्धयाग एवापूर्वसाधक इति नियमनद्वारा प्रतिफलति। उभयोरेकत्र युगपत्प्राप्तौ सत्यामितरनिवृत्तिफलकविधित्वं परिसंख्याविधित्व; यथा "पञ्चपञ्चनखाभक्ष्याः" इति, अत्रनापूर्वत्वं, पञ्चनखभक्षणतदितरभक्षणयोरागतएवप्राप्तत्वात्, नवानियमत्वम्, उभनोर्युगपत्प्राप्तेः। किन्त्वनेन पञ्चनखतदितरकर्मकभक्षणस्य युगपत्प्राप्तौ पञ्चपञ्चनखकर्मकभक्षणेनैव क्षुन्निवृत्तिविधेयेतिकेवलम्परिसंख्यायते।

यद्यपि नियमविधावपि पक्षे प्राप्तावहननस्याप्राप्तांशपरिपूरणेकृते तदवरुद्धत्वात् पाक्षिकसाधनान्तरस्य नखविदलनादेर्निवृत्तिरपि लभ्यत इतीतरनिवृत्तिफजकत्वाविशेषान्नियमपरिसंख्ययोः फलतोभेदोनयुक्तः, तथापि विधितोऽवहननियमं विनाऽऽक्षेपलभ्यस्य नखविदलनदेर्निवर्तयितुमशक्यतयाऽप्राप्तांशपरिपूरणरूपस्य प्राथम्याद् विधेयावहननगतत्वेनप्रत्यासन्नत्वाच्च तस्यैव नियमविधिफलत्वोपगमात्, तदनुनिष्पादिन्या इतरनिवृत्तेरविधेयगतत्वेन विप्रकृष्टायाः सन्निकृष्टफलसम्भवे फलत्वानौचित्यादप्राप्तांशपरिपूरणफलकत्वेनेतरनिवृत्तिफलकत्वेन च तयोर्भेदोविज्ञातव्यस्तत्रेति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नियमपरिसंख्ययोर्दोषत्रयं तावत् स्वार्थहानिप्राप्तबाधपरार्थकल्पनाऽऽत्मकं, तथाहि–नियमपदेन परिसंख्याया एव ग्रहणान्निषेधमुखेन प्रवृत्तिपक्षे वाक्ये प्राप्तस्य पूर्वसूत्रेण प्रातिपदिकत्वस्य बाधः, समासस्य प्रातिपदिकसंज्ञेति योऽयं स्वार्थस्तस्य-त्यागः वाक्यस्य नेति पदार्थकल्पनेति दोषत्रयस्य सत्त्वात् सर्वत्र तादृशस्थले दोष-त्रयङ्कल्पनीयमिति दिक् ।

२९– प्र०) काले निर्दुष्टं वर्तमानत्वं परिष्कृत्य "देवदत्तस्तण्डुलं पचति" "देवदत्तेन तण्डुलः पच्यते" इत्युभयत्रशाब्दबोधे प्राचीननवीनशाब्दिकयोः कीदृशोमतभेद इति तत्तत्पदार्थतत्तदन्वयप्रदर्शनपूर्वकशाब्दबोधप्रदर्शनपुरःसरं सप्रमाणमुपपाद्यताम् ।

(उ०) काले निर्दुष्टं वर्तमानत्वं तावत् प्रयोगविशिष्टत्वं, प्रयोगवैशिष्ट्यञ्च स्वाऽधिकरणत्व–स्वघटकधातुवाच्यक्रियाध्वंसासमानाधिकरणो यः स्वघटकधातुबोध्यत्वेन तात्पर्यविषयीभूतक्रियासमूहान्तर्गताऽऽद्यक्रियाप्रागभावस्तदनधिकरणत्व स्वघटक-धातुवाच्यक्रियाप्रागभावासमानाधिकरणो यः स्वघटकधातुबोध्यत्वेन तात्पर्यविषयीभूतक्रिया समूहान्तर्गतान्त्यक्रियाध्वंसस्तदनधिकरणत्वैतत्त्रितयसम्बन्धेन, यथा पच-तीतिप्रयोगकाले पचतीतिप्रयोगवैशिष्ट्यमादाय वर्तमानत्वं, तथाहि–'पचती" तिप्रयोगाधिकरणत्वमपि कालिकेनतस्मिन्नस्त्येवं स्वघटकधातुवाच्यक्रिया ध्वंसा-समानाधिकरणो यः पचतीतिप्रयोगघटकपच्धातुबोध्यत्वेन तात्पर्यविषयीभूता-धिश्रयणाद्यधः श्रयणान्तपर्यन्तक्रियासमूहान्तर्गताऽऽद्यक्रियाप्रागभावस्तदनधिकरण-त्वमपिचकास्ति यत आद्यक्रियायास्तदानींजातत्वादेवं स्वघटकधातुवाच्यक्रियाप्राग-भावासमानाधिकरणो यः स्वघटकपच्धातुबोध्यत्वेन तात्पर्यविषयी — भूताधिश्रयणा-द्यधःश्रयणान्तक्रियासमूहान्तर्गतान्तक्रियाध्वंसस्तदनधिकरणत्वमप्यस्तीति ।

द्वितीयसम्बन्धनिवेशान्नभविष्यत्पाकक्रियामुद्दिश्य पचतीति प्रयोगः सम्पादयितुं शक्यते, यतः पचतीतिप्रयोगघटकपच्धातुबोध्यत्वेन तात्पर्यविषयीभूतक्रियासमूहान्त-र्गताद्यप्रागभावाधिकरणत्वस्यैव तदानीं सत्त्वात्, तृतीयसम्बन्धनिवेशाच्च नातीत-क्रियामुद्दिश्य पचतीति प्रयोगस्तत्र–पचतीतिप्रयोगघटकपच्धातुजन्यबोधविषयत्वेन तात्पर्यविषयीभूतक्रियासमूहान्तर्गतचरमक्रियाध्वंसानधिकरणत्वस्य तत्रकालेविरहात् । द्वितीयवैशिष्ट्ये स्वघटकधातुवाच्यक्रियाध्वंसासमानाधिकरणत्वस्य विशेषणान्न वर्त-मानपाकक्रियामुद्दिश्य भोक्तुं पचतीति प्रयोगमादाय तत्काले वर्तमानत्वानुपपत्तिर्यतः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वघटकधातुबोध्यत्वेनतात्पर्यविषयीभूतक्रियासमूहान्तर्गताद्यक्रियाप्रागभावपदेन भोजक्रियाप्रयागभावो न नेतुं–शक्यते, तत्र स्वघटधातुवाच्यपाकक्रियाध्वंसासामानाधिकरण्यविरहात्–किन्तुतादृशसामानाधिकरण्यस्यैव तत्र सत्त्वात्,

एवं तृतीयसम्बन्धे स्वघटकधातुवाच्यक्रियाप्रागभावासमानाधिकरणत्वस्य विशेषणात्, न वर्तमानगमनक्रियामुद्दिश्य भुक्त्वागच्छतीतिप्रयोगमादाय तदानीं वर्तमानत्वानुपपत्तिर्यतः स्वघटकधातुबोध्यत्वेन तात्पर्यविषयीभूतक्रियासमूहान्तर्गतान्तिमक्रियाध्वंसपदेन भोजनक्रियाध्वंसो नेतुं न शक्यते, यतस्तत्र स्वघटकधातुवाच्यगमनक्रियाप्रागभावसमानाधिकरण्यस्यैव सत्त्वादिति ।

"क्रियाप्रधानमाख्यातं सत्त्वप्रधानानि नामानी"ति यास्कोक्तेः "भूवादयो धातवः" इति सूत्रस्थक्रियाप्राधान्यबोधकभाष्याच्च प्राचीनशाब्दिकाः कर्त्राख्यातस्थले कर्माख्यातस्थले चोभयत्र व्यापारमुख्यशाब्दबोधमेव मन्यते, तत्र "फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणमि"ति हरिवचनमपि प्रमाणमुपस्थापयति, तेन व्यापारस्य सर्वत्र प्राधान्यबोधनात् ।

नव्यशाब्दिकास्तु कर्त्राख्यातस्थले व्यापारमुख्यविशेष्यकशाब्दबोधम्प्रभिमते, कर्माख्यातस्थले तु फलमुख्यविशेष्यकशाब्दबोधमेव सम्मन्वते, तन्मते "फले प्रधानं व्यापार" इति वचनं तु कर्त्राख्याताभिप्रायेण द्रष्टव्यम् ।

कर्माख्यातस्थले फलमुख्यविशेष्यकशाब्दबोधस्यानङ्गीकारे "सुप आत्मनः क्यच्" इति सूत्रस्थभाष्यासङ्गतिम्प्रदर्शयन्ति तथाहि–तत्र आत्मनः पुत्रमिच्छतीत्यत्रैव 'इष्टः पुत्रः' 'इष्यते पुत्र' इत्यादिविग्रहेऽपि क्यच्कथं नेत्याशङ्क्य–"इहभवन्तस्तावदाहुः । नभवितव्यमिति । किं कारणम् । समानार्थेन वाक्येन भवितव्यं प्रत्ययान्तेन च । यश्चेहार्थो वाक्येन गम्यते । इष्टः पुत्रः । इष्यतेपुत्र इति । नासौ जातुचित् प्रत्ययान्तेनेतिसमाहितम्, अन्यथा कर्त्राख्यातकर्माख्यातस्थले समानमुख्यविशेष्यकशाब्दबोधस्यैवात्राभिप्रेतत्वे तद्भाष्यासङ्गतिः स्पष्टैव स्यादिति ।

तथाच कर्त्राख्यातस्थले उभयोर्मते समान एव शाब्दबोधो यथा देवदत्तस्तण्डुलं पाचतीत्यादौ, तथाहि तत्र तिबर्थे वर्तमानकालैकत्वसंख्याकर्तारः, तेषु वर्तमानकालस्यधात्वर्थव्यापारेऽन्वयः, संख्यायाश्च कर्तरि, कर्तुश्च देवदत्तेऽन्वयः, धात्वर्थः विक्लित्तिविशिष्टव्यापारः, विक्लित्तिवैशिष्ट्यञ्च जनकत्वात्मकं, तथा चैकत्वविशिष्टदेवदत्ता-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऽभिन्नकर्तृकतण्डुलकर्मनिरूपिताधेयतावद्विक्लित्यनुकूलवर्तमानकालावच्छिन्नव्यापार इति बोधः ।

"देवदत्तेन तण्डुलः पच्यते" इति वाक्यात्प्राचीनशाब्दिकमते–एकत्वविशिष्टतण्डुलाऽभिन्नकर्मवृत्तिविक्लितिजनकः एकत्वविशिष्टचैत्राभिन्नकर्तृकवर्तमानकालिको व्यापार इति बोधः ।

नवीनशाब्दिकमते त्वेकत्वविशिष्टचैत्राभिन्नकर्तृवृत्तिवर्तमानकालावच्छिन्नव्यापारजन्यैकत्वावच्छिन्नतण्डुलाभिन्नकर्मवृत्तिविक्लितिरिति बोध इति संक्षेपः ।

३०–(प्र०) वैयाकरणाभिमतं लिङ्पदेशक्यतावच्छेदक प्रदर्श्य कृतिसाध्यत्वादीनां कुतो न लिङर्थत्वमिति सप्रमाणमुपपादनीयम् ।।

(उ०) "विधिनिमन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्" इति सूत्राद्विध्याद्यर्थे लिङ्प्रतीयते, विधिश्चप्रेरणाऽपरपर्य्यायः, यद्विषयकत्वेन ज्ञानस्य प्रवृत्तिजनकत्वं सैव प्रवर्तनेत्युच्यते तथाच-स्वर्गकामोयजेतेत्यादितः यागादिधर्मिकस्वर्गरूपेष्टसाधानताज्ञानात् यागादौ लोकानाम्प्रवृत्तिदर्शनात् इष्टसाधनतैव प्रवर्तनाविज्ञेया, साच यदि वक्त्रपेक्षयाऽपकृष्टोद्देश्यकप्रवर्तकज्ञानप्रकारीभूता तदा प्रेरणेत्युच्यतेऽन्यथा निमन्त्रणादिपदव्यपदेश्याभवति । तथाच प्रवर्तनात्वेन विध्यादिषु शक्तिग्रहे शक्यतावच्छेदके लाघवसम्भवात् प्रवर्तनात्वनैव तावत्सु लिङः शक्तिर्विज्ञायताम्, तथाच लिङ्पदशक्यतावच्छेदकम् प्रवर्तनात्मेव तच्च ःवृत्तिजनकज्ञानविषयतावच्छेदकत्वात्मकम् । लौकिकेवैदिकेवाकर्मणि स्वेष्टसाधनताग्रहानन्तरं प्रवृत्तिजनकं ज्ञानं यागादिधर्मिकेष्टसाधनताग्रहानन्तरं प्रवृत्तिदर्शनात् प्रवृत्तिजनकं ज्ञानं यागादिधर्मिकेष्टसाधनत्वप्रकारताकज्ञानम्, तदीयविषयतेष्टसाधनीभूते तदवच्छेदकताचेष्टसाधनत्वे इति तत्रैव प्रवर्तना त्वमपि पर्य्यवस्यति ।

नच समभिव्याहृतपदोपस्थापितकामनाविषयत्वात्मकेष्टत्वसामान्यधर्मावच्छिन्ननिरूपितसाधनताज्ञानाद् यागादौ प्रवृत्त्यदर्शनात् किन्तु इष्टत्वव्याप्यस्वर्गत्वाद्यवच्छिन्ननिरूपितसाधनताज्ञानादेव यागादौ प्रवर्तनात् स्वर्गत्वाद्यवच्छिन्नसाधनत्वमेव लिङर्थः स्वीकरणीयः, तच्चश्रुतिवाक्यान्नावगम्यत इतिकथं प्रवर्तकज्ञाननिर्वाह इति वाच्यम्, इष्टताच्छेदकत्वधर्ममुपलक्षणीकृत्य तेन रूपेण च स्वर्गत्वादीन्यावद्धर्माननुगमय्य इष्टतावच्छेदकत्वोपलक्षितस्वर्गत्वाद्यवच्छिन्ननिरूपितसाधनतानिरूपितैवैव-शक्तिर्लिङ्पदे इति विज्ञानेनादोषात् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नच"अहरहः सन्ध्यामुपासीत" 'अहरहः श्राद्धमुपासीते"त्यादिवाक्येन कस्यापीष्टस्यानवगमात् कीदृशस्तत्र लिङर्थो विज्ञास्यते, एवं कथङ्कारं सन्ध्यावन्दनादौ प्रेक्षावन्तः प्रवर्तेरन्निति वाच्यं,

दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन्।
सन्ध्यामुपासते येतु सततं संशितव्रताः।
विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्॥

इत्याद्यर्थवादसमर्पितपितृतृप्तिब्रह्मलोकप्राप्त्यादिकमेवेष्टमनुसन्धाय प्रवृत्त्यादिकार्य्यस्योपपत्तेः।

तत्र समवायेन सुखविशेषस्वर्गादिकम्प्रति स्वजन्यादृष्टवत्त्वसम्बन्धेन यागस्यहैतुता, दैनिकपितृश्राद्धस्य तु उद्देश्यतासम्बन्धेन हेतुता विज्ञातव्या। पितॄणां मुक्तत्वे तु तेनैव सम्बन्धेन हेतुता निर्धारणीया।

न च स्वर्गादीष्टसाधनताज्ञानमिव स्वर्गादिधर्मिककृतिसाध्यताज्ञानमपि प्रवर्तकमस्ति तथाच कृतिसाध्यत्वमपि कुतो न लिङर्थं इति वाच्यम्, अनन्यलभ्यस्यैव शक्यार्थतया कृतिसाध्यत्वस्य च विधिप्रभृतिवाक्यजन्यशाब्दबोधानन्तरं, यागादयो मत्कृतिसाध्याः मत्कृतिं विनाऽनुपपद्यमानत्वेसतिमदिष्टसाधनत्वादित्यनुमानेन लाभसम्भवात्।

न च तथाऽपि मधुविषसंपृक्तान्नभक्षणे लोकानां प्रवृत्तिवारणाय इष्टधर्मिकबलवदनिष्टाननुबन्धित्वज्ञानमपि प्रवर्तकं वाच्यं तथाच बलवदनिष्टाननुबन्धित्वमपि विध्यर्थं इतिवाच्यम्, मधुसम्पृक्तान्नभोजनादिधर्मिकद्विष्टताज्ञानस्य तत्प्रवृत्तिम्प्रतिप्रतिबन्धकत्वात्प्रतिबन्धकात्यन्ताभावस्य चावश्यक्लृप्तकार्यंनियतपूर्ववर्तिताकतया तेन बलवनिष्टाननुबन्धित्वाज्ञानस्यान्यथासिद्धेः, किञ्च आस्तिककामुकस्यागम्यागमनधर्मिकनरकसाधनताज्ञानदशायामपि उत्कटेच्छया—द्वेषाभावदशायाम् प्रवृत्तेर्व्यभिचारात् व्यापकताघटितप्रवृत्तिजनकताया बलवदनिष्टाननुबन्धित्वज्ञाने वक्तुमशक्यत्वात्। मिथिलामण्डल मण्डनमीमांसकशिरोमणिमण्डनमिश्रा अपि—

पुंसांनेष्टाभ्युपायत्वात् क्रियास्वन्य. प्रवर्तकः।
प्रवृत्तिहेतुं धर्मंञ्च प्रवदन्ति प्रवर्तनाम्॥

इत्याकारिकया कारिकया प्रवर्तनात्वेनेष्टसाधनतात्मकप्रवर्तनायामेव लिङ्पद-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शक्यतां सम्पादयन्तिसममेतिसंक्षेप: ।।

३१—(प्र०) भाट्टाभिमतं विध्यर्थं निरूप्य तन्मते विधिवाक्यत: शाब्द-बोधम्प्रदर्श्य शाब्दिकदिशा तन्मतं निराकुर्वताम् ।।

(उ०) भाट्टाशयोऽयम्–प्रवृत्तिर्द्विविधा भवति स्वेच्छाधीना परेच्छीना, तत्राद्यायाम्प्रवृत्तौ इष्टसाधनताज्ञानं कारणं, द्वितीयायाम्प्रवृत्तौ तु आज्ञाप्रेरणादिज्ञानं कारणम्-यतो लोके गुरोरज्ञयेदं करोमि चैत्रस्य प्रेरणयेदंकरोमीतिप्रभृतिव्यवहारदर्शनात् । आज्ञादिश्च प्रवर्तयितृनिष्ठप्रवर्त्यपुरुषप्रवृत्त्यनुकूलव्यापाररूपा भावनैव, साच यत्र चेतन: प्रवर्तयिता तत्र तन्निष्ठाऽभिप्रायविशेषरूपा, यत्र चाचेतनः प्रवयिता तत्राभिधापदव्यपदेश्या प्रवर्तनाऽपरपर्याया प्रवृत्त्यनुकूलव्यापारविशेषरूपैव भावना तादाम्त्येन लिङ्लोडादिनिष्ठा, समवायानङ्गीकारेण धर्मधर्मिणोस्तादम्यस्यैवोपगमात् ।

अतएवैनां शाब्दीभावनेतिव्यपदिशन्ति विद्वांस: ।

तथाच गुर्वभिप्रायज्ञानाद्यथा शिष्य: कर्मणि प्रवर्तते तथा लिङादिनिष्ठोक्तभावनाविज्ञानात् सर्वे आस्तिकपुरुषा यागादिकर्मसु प्रवर्तन्ते ।

इत्थं च–भावना द्विविधा आर्थीभावनाशाब्दीभावनाभेदात् , तत्रार्थीभावनाऽर्थनिष्ठा, अर्थश्च यागादिरात्मा च–तत्र यागादिनिष्ठत्वम्–यागादिविषयकत्वम् , आत्मनिष्ठत्वमात्माश्रितत्वं, तथाचात्माश्रिता यागादिविषयिका प्रवर्तनाऽऽर्थीभावना , आर्थीभावनाविषयिका शब्दनिष्ठा भावना शाब्दीभावना, उभयीअपि लिङादिविधिवाच्या भवति, तत्राद्या-लडादिवाच्याऽपि भवति "अभिधाभावनामाहुरन्यामेव लिङादय: । 'अर्थात्मभावना त्वन्यासर्वाख्यातस्य गोचर:' इति वचनात् तथैव प्रतीते ।

आर्थीभावना तावदर्थविषयिणी आत्मनिष्ठाभावना, तत्रभावनात्वं नाम–किंभाव्यं केनभाव्यं कथं भाव्यमित्यंशत्रयवद्व्यापारत्वात्मकम्— तत्रशाब्दीभावनायां किम्भाव्यमितिफलाकाङ्क्षायाम् आर्थीभावना फलत्वेन सम्बध्यते, कथंभाव्यमिति इतिकर्तव्यताकांक्षायां प्राशस्त्यज्ञानमितिकर्तव्यतात्वेनोपतिष्ठते, केनभाव्यमिति करणकांक्षायां लिङादिज्ञानं करणत्वेनान्वेति, आर्थीभावनायां तु स्वर्गादि फलत्वेन, यागादि: करणत्वेन, प्रयाजानुयाजादिकमितिकर्तव्यतात्वेन सम्बध्यते—

तथा च—स्वर्गकामो यजेतेति विधिवाक्यतो यागकरणकप्रयाजादीतिकर्तव्य-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ताकस्वर्गफलकभावना लिङ्ज्ञानकरणकप्राशस्त्यज्ञानेतिकर्तव्यताकप्रवर्तनाविषयीभूतेति शाब्दबोध इति।

किन्तु–शाब्दिकास्तन्मतमाक्षिपन्ति–यतो लोके स्तन्यपानादिप्रवृत्ताविष्टसाधनताज्ञानस्यैव हेतुतया ततएव वैदिकवाक्यस्थलेऽपि प्रवृत्त्युपपत्तौ लिङादिप्रवर्तनाज्ञानस्य प्रवर्तकत्वे मानाभावात्।

अथच–प्रवर्तनाविषयत्वमात्रज्ञानात्–प्रवृत्त्यनुपपत्तेरावश्यकेष्टस्वर्गसाधनत्वादिज्ञानादेव स्वेच्छया यागादौ प्रवृत्तेः कल्पनीयत्वादचेतनस्य प्रवर्तकत्वासम्भवाच्चेति दिक्॥

३२—(प्र०) प्राभाकराभिमतं लिङर्थं निरूप्य तन्मते विधिवाक्यस्थले शाब्दबोधम्प्रदर्श्य नागेशदर्शितपञ्चविधबोधस्य क्रमशः काऽत्रशक्यता? एकदैव कथं न तावद्विषयकबोध इति स्पष्टमुपपादयन्तु॥

(उ०) प्राभाकराणामयमाशयः–"स्वर्गकामोयजेते"त्यादौ लिङो नेष्टसाधनत्वमर्थो भवितुमर्हति "अहरहः सन्ध्यामुपासीते"त्यादौ नित्यस्यकर्मणः फलविशेषाजनकत्वेन सन्ध्योपासनं मदिष्टसाधनमिति बोधस्य भ्रमत्वादप्रामाण्यापत्तेः।

नच कार्यत्वमेवलिङर्थमभिप्रेत्योक्तवाक्यात् स्वर्गकामनियोज्यताको यागः कार्यतावान् इति बोधसम्पादने न काचन क्षतिरिति वाच्यं स्वर्गकामनियोज्यताकत्वस्य स्वर्गकामकृतिसाध्यत्वात्मकतया–कार्य्यत्वस्यापि कृतिसाध्यत्वात्मकतया स्वर्गकामकृतिसाध्यताविशिष्टे यागे कृतिसाध्यताया अन्वये निराकांक्षतया तथाविधबोधाऽसम्भवात्।

नच–स्वर्गकामनियोज्यताकत्वं नाम–स्वर्गकामसमवेतकृतिसाध्यत्वप्रकारकज्ञानविशेष्यतात्मकं, तद्विशिष्टे च यागे कार्यताऽन्वयःसम्भवतीति वाच्यं, तथासति "स्वर्गकामः पचेदि" प्रामाण्यप्रसङ्गात्यतः स्वर्गकामनिष्ठं यत् "पाकोमत्कृतिसाध्य" इत्याकारकं ज्ञानं तदविशेष्यत्वस्य पाके सम्भवात्। किन्तु स्वर्गकामनियोज्यताकत्वं स्वर्गकामनिष्ठस्वर्गसाधनताज्ञानजन्यकार्यताज्ञानविशेष्यत्वात्मकमित्यश्च— स्वर्गकामनिष्ठं यत् स्वर्गसाधनताज्ञानम् तद्यागविशेष्यकं प्रथमं न सम्भवति यागस्य हि इच्छाविशेषरूपत्वेन स्वर्गपर्यन्तस्थायित्वाभावात् साक्षात्स्वर्गसाधनत्वासम्भवात्, किन्तु स्वजन्यापूर्वद्वारैव तथा चापूर्वस्यादृष्टापरपर्यायस्य तदुपस्थापकपदाभावे उपस्थित्यसम्भवात् कार्यमेवाऽपूर्वोऽदृष्टापरपर्यायो लिङर्थो विज्ञातव्यः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तथा च लिङादिपदेन कार्योपस्थित्या स्वर्गकामनिष्ठेन "कार्यं स्वर्गसाधनम्" इत्याकारकज्ञानेन जायमानं यत् "कार्यं कृतिसाध्यमि"त्याकारकं ज्ञानम् तद्विशेष्यत्वस्यापूर्वे सत्त्वात् तत्र स्वर्गकामनियोज्यताकत्वं निर्वहति। तदेकदेशकृतौ च धात्वर्थयागादेर्विषयतासम्बन्धेनान्वयः, तथा च "यागविषयकं कार्यं स्वर्गकामनियोज्यताकमि"ति प्राथमिको बोधः। अनन्तरं "स्वर्गकामनियोज्यताकं स्थायि स्वर्गसाधनं कार्यमि"ति द्वितीयो बोधोऽनन्तरं यागजन्यस्यापूर्वस्य स्वर्गकामकृतिसाध्यत्वं स्वर्गकामनियोज्यताकत्वं वा, यागस्य स्वर्गकामकृतिसाध्यत्वं स्वर्गकामनियोज्यताकत्वं विनाऽनुपपन्नमितिहेतोः तद्वाक्यादेव 'यागः स्वर्गकामनियोज्यताकः स्वर्गकामकृतिजन्यश्चे'त्याकारको बोधः। अनन्तरं यागकृतेराश्रयः क इत्यपेक्षायाम् "स्वर्गकामोयागकृतिमान्" इत्याकारकश्चतुर्थो बोधः, अनन्तरम् पुरुषाणामप्रेरणेनैवावश्यकर्तव्यबुद्ध्या स्वयम्प्रवृत्त्युत्पादनाय "अहं स्वर्गकामोऽतोयागो मत्कृतिसाध्य" इतिपञ्चमो बोधस्तदनन्तरं सर्वानुपपत्त्याकांक्षाप्रशान्तेरिति।

न च प्रथम एव "स्वर्गकामकृतिजन्यो याग" इति बोधोऽस्तु, तथाच कार्य्यत्वे एव शक्तिः पर्यवसास्यतीति वाच्यं, यागादिक्रियायां स्वर्गकामनियोज्यताकत्वान्वयं विना कार्यत्वान्वयस्य वक्तुमशक्यत्वात्। यतो नियोज्यत्वं क्रियानिष्ठकाम्यसाधनताज्ञानाधीन"मत्कार्यं मि"तिबोधवत्त्वम् तच्च 'घटेन जलमाहरे'त्यत्र घटे सच्छिद्रेतरत्ववत् स्वर्गकामनादिविशिष्टे योग्यतावच्छेदकतया भासते।

न च यागे स्वर्गसाधनत्वज्ञानं विनेदृशं नियोज्यत्वम्भवितुमर्हति, न वा यागे स्वर्गसाधनत्वम्प्रथमं ज्ञातुं शक्यम्, आशुविनाशिनो यागस्य कालान्तरभाविनि स्वर्गे साक्षाद्धेतुत्वासम्भवात्, अपूर्वस्य तदानीमनुपस्थित्या तद्द्वारापि प्रथमं वक्तुमशक्यत्वात्। अतो यागविषयकं कार्यमिति प्रथमबोधादपूर्वोपपस्थितौ तद्द्वारा यागे स्वर्गसाधनत्वग्रहात् ततस्तत्र कार्यताबोध इति दिक्।

३३—(प्र०) नैयायिकाभिमतं लिङर्थं निरूप्य तत्रैका शक्तिः पृथक्पृथग्वेति विविच्य "ब्राह्मणो न हन्तव्यः" "न कलञ्जं भक्षयेदि" त्युभयत्र कस्यात्यन्ताभावो नञा बोध्यते ! "स्वर्गकामो यजेते"ति वाक्यतस्तन्मते कीदृशो बोधः ?

(उ०) नैयायिकानाम्मते–यागादिविषयकप्रवृत्तिम्प्रति यागादिधर्मिककृति-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

साध्यताज्ञानस्य यागादिधर्मिकेष्टसाधनताज्ञानस्य यागादिधर्मिकबलवदनिष्टाननुबन्धिज्ञानस्य च कारणतया कृतिसाध्यत्वेष्टसाधनत्वबलवदनिष्टाननुबन्धित्वैतत्त्रितयमेव लिङर्थः। यागादिविषयकप्रवृत्तिम्प्रति यागादिधर्मिककृतिसाध्यतादित्रितयविषयकज्ञानस्यैकस्य हेतुत्वं तु वक्तुमशक्यं, विनिगमनाविरहात् कृतिसाध्यत्वादीनां त्रयाणाम् परस्परविशेष्यविशेषण भावे गुरुधर्मावच्छिन्नानेकप्रवृत्तिकारणत्वप्रसङ्गात्। एवं कृतिसाध्यत्वविशिष्टेष्टसाधनत्वविशिष्टबलवदनिष्टाननुबन्धित्वस्य लिङ्पदशक्यत्वे त्रयाणां विशेष्यविशेषणभावे विनियोगमनाविरहेण गुरुधर्मावच्छिन्नानेकशक्यताप्रसङ्गात्।

तथाच सुमेरुशृङ्गाहरण–निष्फलाचरण-मधुविषसंपृक्तान्नभोजनेषु न प्रेक्षावताम्प्रवृत्तिस्तेषु परस्परसहकारितापन्नस्य दर्शितज्ञानत्रयस्य कारणस्याभावात्।

कृतिसाध्यत्वं तावत् प्रवृत्तिसाध्यत्वमतो न समुद्रतरणे प्रेक्षावताम् प्रवृत्तिः, इष्टसाधनत्वम् इष्टनिष्ठसाध्यतानिरूपकत्वमतो न तृप्तस्य पुनर्भोजने प्रवृत्तिस्तदानीं तदीयभोजनस्येष्टसाध्यतानिरूपकत्वाभावात्। बलवदनिष्टाननुबन्धित्वं तावत् स्वजन्येष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वमतो "नहि सुखं दुःखैर्विना लभ्यत" इति न्यायात्पाकादौ प्रेक्षावन्तः प्रवर्तन्ते तत्र पाकजन्येष्टोत्पत्तिनान्तरीयकदुःखाऽधिकदुःखाजनकत्वात्। मधुविषसम्पृक्तान्नभोजने च न प्रवर्तन्ते–तत्र तादृशदुःखाधिकदुःखजनकत्वात्। "ब्राह्मणो न हन्तव्यः" "न कलञ्जं भक्षयेदि"त्यादिस्थले ब्राह्मणकर्मकहनन—कलञ्जकर्मकभक्षणयोरिष्टसाधनत्वकृति —साध्यत्वयोरबाधेऽपि बलवदनिष्टाननुबन्धित्वस्य बाधात्तदत्यन्ताभावबोधने एव नञ स्तात्पर्यमवधार्यमिति नागेशाऽभिप्रायः।

किन्तु—सिद्धान्तपर्य्यालोचनया त्रयाणां विध्यर्थत्वे एकस्य निषेधो न युक्तः, त्रयाणां निषेधस्त्वसम्भवोऽतो नञ्समभिव्याहारस्थले तेषामेकैकविशिष्टापरस्य विध्यर्थत्वं तदभावस्य च नञर्थत्वं स्वीकार्यं, त्रयाणां विशेष्यविशेषणभावे विनिगमनाविरहाद् गुरुधर्मावच्छिन्नानन्ताभावप्रतीतिशङ्का तु न विधेया, यतो विशेष्यवति विशिष्टाभावस्य विशेषणाभावरूपत्वेन विशेषणवति विशिष्टाभावरूपत्वेन प्रकृते तत्तद्विशिष्टाभावानां बलवदनिष्टाननुबन्धित्वाभावरूपतैव स्यादिति मैथिलाः॥

"स्वर्गकामो यजेते"ति वाक्याच्छाब्दबोधस्तु कृतिसाध्यताविशिष्टेष्टसाधनता-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विशिष्टबलवदनिष्टाननुबन्धित्वविशिष्टयागानुकूलकृतिमान् स्वर्गकाम इत्याकारक इति संक्षेपः ॥

३४—(प्र०) नागेशाभिमतं कारकत्वकर्तृत्वोभयमन्याऽभिमतलक्षणान्तरनिरसनपूर्वकं परिष्कृत्य प्रथमार्थस्य संबोधनार्थस्य च कारकत्वं समर्थ्य "देवदत्त ! त्वं गच्छ" 'चैत्रेण ग्रामो गम्यते" इत्युभयवाक्याभ्यां कीदृशः शाब्दबोध इति शाब्दिकसरण्यां प्रकाशयन्तु ।

(उ०) करोति क्रियां निष्पादयति यः स कारकस्तस्य भावस्तत्त्वमिति व्युत्पत्त्या क्रियानिष्पादकत्वात्मकं कारकत्वं पर्यवसन्नं, तत् स्थूलपरिष्कारदिशाऽन्यथासिद्धिशून्यत्वे सति कार्य्याव्यवहितप्राक्क्षणावच्छेदेन कारणतावच्छेदकसम्बन्धेन कार्यताघटकसम्बन्धेन कार्य्याधिकरणवृत्तिर्योऽभावस्तत्प्रतियोगितानवच्छेदकधर्मवत्त्वं, यथा चैत्रः पचतीत्यत्र चैत्रस्य कारकत्वं, तथाहि कार्य्याव्यवहितप्राक्क्षणावच्छेदेन कार्यतावच्छेदकसम्बन्धेन समवायात्मकेन पाकरूपकार्य्याधिकरणे तादात्म्यसम्बन्धेन चैत्रस्य सत्त्वात्तत्सम्बन्धावच्छिन्नाभावप्रतियोगिता न वर्ततेऽतस्तादृशप्रतियोगितानवच्छेदकचैत्रत्ववत्त्वस्यान्यथासिद्धिशून्यत्वस्य च सत्त्वात्तत्र कारकत्वव्यवहार उपपद्यते ।

"चैत्रस्य तण्डुलं पचती"त्यत्र पाकक्रियानिरूपितकारकत्वं न चैत्रे विज्ञेयं तस्यान्यथासिद्धिशून्यत्वाभावात् । 'ब्राह्मणाय गां ददाती"त्यादौ स्वस्वत्वध्वंसानुकूलपरस्वत्वप्रकारकेच्छाया एव दाधात्वर्थतया तत्र स्वानुमतिप्रकाशनद्वारा क्रियाकर्मसम्बन्धन्धितया कर्त्राभिप्रेतस्य ब्राह्मणस्यापि क्रियाजनकत्व— मक्षतमेव । क्वचन सम्प्रदानस्यानुपस्थितिदशायामनुमतिप्रकाशनाऽभावेऽपि दातुर्बुद्धिविषयतया क्रियाजनकताया उपपादनीयत्वात् । "कटे आस्ते" इत्यत्र स्थितिक्रियाम्प्रत्याधारतया कटस्य क्रियाजनकत्वं सुलभमेव । "वृक्षात्पर्णं पतती"- त्यत्रापि वृक्षाऽभावे तदवधिकविभागानुकूलव्यापारस्यैवासम्भवात् क्रियाजनकत्वमस्त्येव वृक्षस्य । घटङ्करोतीत्यादिस्थले कर्मणोऽविद्यमानतया वास्तवक्रियाजनकत्वा भावेऽपि बुद्धिविषयतामापाद्याऽऽरोप्य वा तदस्तीति वक्तुं शक्यत्वादिति ।

कर्तृत्वं तावत् प्रकृतधातुवाच्यव्यापाराश्रयत्वं "धातुनोक्तक्रिये नित्यं कारके कर्तृतेज्यते" इति भर्तृहरिवचनात्प्रतीयते, वह्निना पचतीत्यादिस्थले वह्नेस्तु न

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कर्तृत्वं, तद्व्यापारस्य प्रज्वलनादेः प्रकृतधातुवाच्यत्वाभावात्। प्रयोज्यव्यापारस्यापि प्रकृतधातुवाच्यतया तदाश्रयत्वेन प्रयोज्यस्य कर्तृत्वमुपपद्यते।

किन्तु यथाश्रुतैतल्लक्षणे "अग्नेर्माणवकं वारयती" त्यादौ माणवकस्य कर्तृत्वापत्तिस्तस्य प्रकृतधातुवाच्यसंयोगानुकूलव्यापारवत्त्वात्, प्रधानीभूतप्रकृतधातुवाच्यव्यापाराश्रयत्वस्य कर्तृत्वपदार्थत्वेतु–माणवकव्यापारस्य प्रधानतया प्रकृतधातुवाच्यत्वाभावेन कर्तृत्वाभावेऽपि "अजा ग्रामं नीयते" इत्यत्राऽजाव्यापारस्य संयोगानुकूलव्यापारस्य प्रधानतयाऽजायाः कर्तृत्वापत्तेः, "पक्वस्तण्डुलो देवदत्तेने" त्यत्र व्यापारस्याप्राधान्येन देवदत्तस्य कर्तृत्वानापत्तेरतः धातुविशिष्टव्यापारवत्त्वमेव कर्तृत्वमवगन्तव्यं, धातुवैशिष्ट्यञ्च व्यापारे, स्वजन्यबोधविषयत्वेन तात्पर्य्यविषयत्वस्वजन्यबोधविषयत्वेन तात्पर्य्यविषयीभूतार्थनिरूपितजन्यत्वेनाप्रतीयमानत्व–स्वबोध्यत्वेन तात्पर्य्यविषयीभूतार्थनिरूपित जन्यत्वेन प्रतीयमानाभावाप्रतियोगित्वैतत्त्रितयसम्बन्धेन, यथा "देवदत्तः पचती" त्यत्र पच्धातुविशिष्टविक्लित्यनुकूलव्यापारवत्ताया देवदत्ते सत्त्वात् तस्य कर्तृत्व, पच्धातुवैशिष्ट्यस्य विक्लित्यनुकूलव्यापारे सत्त्वात्, तथाहि–पच्धातुजन्यबोधविषयत्वेन तात्पर्य्यविषयत्वमप्यस्ति, पच्धातुजन्यबोधविषयत्वेन तात्पर्य्यविषयीभूतार्थनिरूपितजन्यत्वेनाप्रतीयमानत्वमप्यस्ति, स्वबोध्यत्वेन तात्पर्यविषयीभूतार्थनिरूपित जन्यत्वेन प्रतीयमानाभावाप्रतियोगित्वमप्यस्ति।

प्रथमवैशिष्ट्यनिवेशाद् देवदत्तवृत्तिव्यापारविवक्षायां स्थाल्यादेर्न कर्तृत्वम्, द्वितीयसम्बन्धनिवेशात् "अजाग्राम नीयते" इत्यत्राजाया न कर्तृत्वं, तृतीयसम्बन्धनिवेशाद् "अग्नेर्माणवकं वारयती" त्यत्र माणवकस्य न कर्तृत्वम्।

सूत्ररीत्या कर्तृकर्मार्थकप्रत्ययेन कर्त्रादेरुक्तत्वात् प्रथमायाः प्रातिपदिकार्थ एवार्थस्तस्य चाख्यातार्थकर्त्रादिनाऽन्वयः, आख्यातार्थस्य च क्रियायामन्वयस्तथा चाख्यातार्थान्वयद्वारा तदर्थस्यापि क्रिययाऽन्वयात् कारकत्वं, तद्विभक्तेश्च कारकविभक्तित्वव्यवहारः।

सम्बोधनप्रथमार्थस्यापि अनुवाद्यत्वेनोद्देश्यतया युष्मदर्थाऽभेदे सति पश्चाद्विधेयक्रियायामन्वयात् क्रियाजनकत्वरूपं कारकत्वं, तद्विभक्तेश्च कारकविभक्तित्वव्यवहार इति।

चैत्रपदोत्तरतृतीयायाः कर्ताऽर्थस्तस्य तादात्म्येन चैत्रेऽन्वयः, कर्तुश्च वृत्तित्व-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सम्बन्धेन धात्वर्थव्यापारेऽन्वयस्तस्य च जन्यत्वसम्बन्धेन फलेऽन्वयस्तत्रैव निष्ठत्वसम्बन्धेन ग्रामपदोत्तरप्रथमार्थकर्मणोऽन्वयः, आख्यातार्थसंख्यायाश्च कर्मपदार्थेऽन्वयः।

तथाच कर्मप्रत्ययस्थले फलमुख्यविशेष्यकशाब्दबोधस्यैव नागेशाभिप्रेततया चैत्राभिन्नकर्तृवृत्तिव्यापारजन्यैकत्वावच्छिन्नग्रामाऽभिन्नकर्मनिष्ठः संयोग इति संक्षिप्तबोधः।

'देवदत्त त्वं गच्छे'त्यादौ सम्बोध्यनिष्ठोऽभिमुखी भाव एव सम्बोधनार्थः "सिद्धस्याऽभिमुखीभावमात्रं सम्बोधनं विदुः" इति हरिकारिकावचनात् प्रतीयते, तस्याश्रयतासम्बन्धेन सम्बोधन कृत्यर्थेऽन्वयः, प्रकृत्यर्थस्य च स्वोद्देश्यकत्वसम्बन्धेन लोडर्थप्रवर्तनायामन्वयः, प्रवर्तनायाश्च विषयतासम्बन्धेन धात्वर्थव्यापारेऽन्वयस्तथा च "देवदत्त त्वं गच्छे" ति वाक्यादभिमुखीभवद्देवदत्तोद्देश्यक—प्रवर्तनाविषयस्त्वत्कर्तृकङ्गमनमिति शाब्दबोधः॥

'क्रियानिमित्तत्वं' कारकलक्षणन्तु अनुमत्यादप्रकाशनद्वारा सम्प्रदानादेरिव तण्डुलादिद्वारा पाकक्रियानिमित्तत्वस्य चैत्रेऽपि सत्त्वात् "चैत्रस्य तण्डुलम्पचती" त्यत्र चैत्रस्य कर्तृत्वापत्त्याऽश्रद्धेयमेव॥

एवं कारकान्तराऽप्रयोज्यत्वे सति कारकचक्रप्रयोजकत्वरूप—कर्तृलक्षणमपि "स्थालीपचति" "असिश्छिनत्ती" त्यादौ स्थाल्यादेः कारकचक्राप्रयोजकत्वात् कारकान्तरकर्तृप्रयोज्यत्वाच्च तत्र कर्तृलक्षणाऽव्याप्त्याऽश्रद्धेयमेवेति दिक्।

३५—(प्र०) प्रतिपदव्यावृत्तिप्रदर्शनपूर्वकं निष्कृष्टम् ईप्सितकर्मलक्षणं परिष्कृत्य 'प्रयागात्काशीं गच्छती' त्यत्र प्रयागस्य कर्मत्ववारणाय फले प्रकृतधात्वर्थत्वनिवेशस्य परमावश्यकत्वे तनव प्रकृतव्यापारस्याप्यनुगमसम्भवे व्यापारे प्रकृतधात्वर्थत्वनिवेशस्य कथं न निरर्थकत्वम्?

(उ०) ईप्सितकर्मत्वं तावत्— प्रकृतधात्वर्थप्रधानीभूतव्यापाराश्रयाऽभिन्नाश्रयवृत्तिर्या प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वप्रकारिकेच्छा तादृशेच्छीयोद्देश्यत्वयोग्यताविशेषशालित्वम्। लक्षणसमन्वयो यथा 'चैत्रो ग्रामं गच्छती" त्यत्रग्रामे तत्र प्रकृतधात्वर्थसंयोगानुकूलव्यापाराश्रयचैत्राऽभिन्नसमवेता या प्रकृतधात्वर्थसंयोगात्मकफलाश्रयत्वप्रकारिका ग्रामविशेष्यिकेच्छा सा "ग्रामः संयोगाश्रयो भवत्वि" त्याकरिका तादृशेच्छीयोद्देश्यत्वयोग्यताविशेषाश्रयत्वस्य ग्रामेऽनपायात्। "गांपयोदोग्धी" त्यत्र पयसः कर्मत्वसिद्धये प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यत्वनिवेशोऽन्यथा तज्जन्यत्वनिवेशे प्रकृतधात्वर्थविभागानुकूल-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्यापारानुकूलव्यापारजन्यताया गोवृत्तिविभागानुकूलव्यापारात्मकफले एव सत्त्वेन तदाश्रयतया गोः कर्मत्वेऽपि पयसा कर्मत्वानापत्तेः, प्रयोज्यत्वनिवेशे तु पयोवृत्तिसंयोगस्यापि गोपवृत्तिव्यापाराभावप्रयुक्ताभावप्रतियोगित्वेन गोपवृत्तिव्यापारप्रयोज्यतया तादृशव्यापारप्रयोज्यसंयोगाश्रयत्वप्रकारकपयोविशेष्यकेच्छीयोद्देश्यतायास्तत्र सत्त्वान्न कर्मत्वानुपपत्तिः ।

"प्रयागात् काशीं गच्छती" त्यत्र प्रकृतधात्वर्थव्यापारप्रयोज्यविभागाश्रयत्वप्रकारकेच्छीयोद्देश्यतायाः प्रयागे सत्त्वात्–तत्र कर्मत्ववारणाय फले प्रकृतधात्वर्थत्वनिवेशस्तन्निवेशे तु विभागस्य प्रकृतधात्वर्थतावच्छेदकफलत्वाभावेन न तत्र कर्मत्वमिति ।

व्यापारे प्रकृतधात्वर्थत्वानिवेशेऽन्यधात्वर्थव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वप्रकारकेच्छोद्देश्यतयाऽग्नेः कर्मत्वापत्तौ विशेषापादानसंज्ञाया निरवकाशतया सामान्यतो बाधकत्वापत्तौ माणवकस्यापि कर्मत्वानापत्तेः ।

उद्देश्यत्वनिवेशात् "काशीं गच्छन् पथि मृतः" इत्यादौ काश्याः प्रकृतधात्वर्थव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयाभावेऽपि तादृशफलाश्रयत्वकारकेच्छोद्देश्यत्वसत्त्वान्नकर्मत्वहानिः ।

योग्यताविशेषनिवेशाच्च काशीङ्गच्छति चैत्रे तत्रत्ये "काशीङ्गच्छति न प्रयागमि"ति प्रयोगे प्रयागस्य तादृशफलाश्रयत्वाभावेऽपि फलाश्रयत्वप्रकारकेच्छीयोद्देश्यत्वयोग्यताविशेषस्यानपायान्न प्रयागस्य कर्मत्वानुपपत्तिः । कालत्रयेऽपि काशीगमनशून्यञ्चैत्रमुद्दिश्य "काशीं गच्छति चैत्रः" इत्यादिप्रयोगप्रसञ्जननिराकरणाय तादृशयोग्यतायां विशेषत्वनिवेश इति संक्षेपः ।

३६—(प्र० कर्मत्वलक्षणघटकप्राधान्यस्य काऽऽवश्यकता ? आवश्यकत्वे वा—"ग्रामङ्गच्छन् विष्णुं स्मरति"त्यत्र गमधात्वर्थव्यापारेऽसत्त्वाद् ग्रामस्य कुतो न कर्मत्वानुपपत्तिरिति शङ्कां निराकृत्यादनं भुञ्जानो विषं भुङ्क्ते इत्यादिस्थलीयविषसाधारणकर्मत्वमपि प्रतिपदव्यावृत्तिपूर्वकम्प्रदर्शनीयम् ।

(उ०) प्रकृतधात्वर्थव्यापारे प्राधान्याऽनिवेशेऽग्नेर्माणवकं वारयतीत्यत्राग्नेः कर्मत्वापत्तिर्यतः प्रकृतधात्वर्थव्यापारपदेन संयोगानुकूलव्यापारस्य माणवकनिष्ठस्य ग्रहणसम्भवात्तमादाय तत्प्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वप्रकारकेच्छीयोद्देश्यताया

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अग्नावपिसम्भवात् । प्राधान्यनिवेशे तु–न तत्र कर्मत्वापत्तिर्माणवकव्यापारस्य तत्र प्राधान्याभावात् । प्राधान्यञ्च प्रकृते न शाब्दबोधीयप्रकारत्वासमानाधिकरणविशेष्यतावत्त्वात्मकं किन्तु–प्रकारतयाऽसमानाधिकरणशक्तिज्ञानाधीनोपस्थितीयविशेष्यतावत्त्वात्मकं, तथा च "ग्रामङ्गच्छन् विष्णुं स्मरती"त्यत्र शतृप्रत्ययार्थकर्तरि प्रकारतया प्रकृतगम्धात्वर्थस्य शाब्दबोधे प्रकारतया भानेऽपि गम्धात्वर्थव्यापारस्य शक्तिज्ञानाधीनोपस्थितिविशेष्यताकाले उपस्थितीयप्रकारताया असत्त्वेन शक्तिज्ञानाधीनोपस्थितीयप्रकारत्वासमानाधिकरणतादृशविशेष्यतावत्त्वेन न गमधात्वर्थव्यापारस्य प्राधान्यानुपपत्तिः ।

"ओदनं भुञ्जानो विषं भुङ्क्ते" इत्यत्र विषकर्मणीप्सितकर्मत्वाभावेऽपि "तथायुक्तं चानीप्सितमि"ति सूत्रद्योत्यस्य प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वात्मककर्मत्वस्यानपायान्न कर्मत्वानुपपत्तिः ।

प्रकृतधात्वर्थत्वस्य फले निवेशान्न "प्रयागात् काशीं गच्छती"त्यत्र प्रयागस्य कर्मत्वापत्तिः, व्यापारे प्रकृतधात्वर्थत्वनिवेशान्न "अग्नेर्माणवकं वारयती"त्यत्राग्नेः कर्मत्वप्रसक्तिः, प्राधान्यनिवेशाच्च न माणवकव्यापारमादायाग्नेः कर्मत्वप्रसक्तिरधिकं तु स्वयमनुसन्धेयमिति दिक् ।

३७—(प्र०) तार्किकैः कर्मलक्षणमुक्तं कीदृशम् ? तद्वैयाकरणेभ्यः कथं न रोचते इति स्पष्टमुपपादय ।

(उ०) तार्किकैर्धात्वर्थतावच्छेदकं यद्व्यापारव्यधिकरणफलं तदाश्रयत्वमेव कर्मत्वमुच्यते ।

तथा च प्रयागात् काशीं गच्छतीत्यत्र न प्रयागस्य कर्मत्वप्रसक्तिर्यतस्तस्य गम्धात्वर्थव्यापारजन्यफलाश्रयत्वेऽपि गम्धात्वर्थतावच्छेदकसंयोगरूपफलाश्रयत्वाभावात् ।

एवं न चैत्रश्चैत्रङ्गच्छति" इति स्वङ्कर्मादाय कर्मत्वाऽऽपत्तिस्तस्य धात्वर्थतावच्छेदकसंयोगात्मकफलस्य द्विष्ठतया सत्त्वेऽपि गम्धात्वर्थतावच्छेदकसंयोगरूपफलशालित्वाभावात् । किन्तु "काशीं गच्छन् पथि मृतः" इत्यादौ–"ग्रामं न गच्छती"त्यादौ गमधात्वर्थतावच्छकसंयोगरूपफलशालित्वाभावात् काशीग्रामयोः कर्मत्वानुपपत्त्या यथाश्रुतंतल्लक्षणं हेयमेव तेषामिति मन्तव्यम् ।

३८—(प्र०) वैयाकरणाभिमतं करणलक्षणं निर्दुष्टं सप्रमाणमुच्यताम् ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अन्धकारपिहिते गृहे "चक्षुषा न पश्यति घटमि"त्यादिस्थले चक्षुषः करणत्वमुपपादनीयम् ? "रामेण बाणेन वाली हन्यत" इति वाक्याच्छाब्दबोधोऽपि सान्वयः प्रदर्शनीयः।

(उ०) "साधकतमं करणमिति" सूत्रात् प्रकर्षविशिष्टस्य साधकस्य करणसंज्ञा विधीयते, प्रकर्षश्चेतरकारणसमवधाने फलजनकव्यापारवत्त्वं, तथा च "स्वव्याप्येतरयावत्कारणसमवधाने सति स्वनिष्ठव्यापाराव्यवहितोत्तरक्षणवृत्तिफलनिष्पत्तिजनकत्वमे" व करणत्वं पर्य्यवस्यति। लक्षणसमन्वयो यथा-"रामेण बाणेन हतो वाली" त्यादौ बाणे। तत्रहि—रामवृत्तिधनुराकर्षणादिव्यापारोत्तरबाणव्यापारे सञ्जाते बाणेतरप्राणवियोगसम्पादककारणव्यापारे सञ्जाते बाणेतरप्राणवियोगसम्पादककारणकलापे च सति बाणस्य स्वनिष्ठव्यापाराव्यवहितोत्तरक्षणवृत्तिप्राणवियोगरूपफलनिष्पत्तिजनकतायास्तत्रावश्यम्भावेन करणतायाः सत्त्वात्।

अन्धकारपिहिते गृहे चक्षुषा घटदर्शनाभावेऽपि चक्षुरितरतिमिराभावादिकारणकलापसमवधाने सति कर्तृव्यापारानन्तरं चक्षुर्व्यापारे सति तदव्यवहितोत्तरक्षणे चाक्षुषस्य घटनिष्ठविषयताया वा फलस्यावश्यमुत्पादेन तादृशफलनिष्पादकतायास्तत्राक्षतत्वादुपपद्यत एव सुलभतया करणत्वम्।

'रामेण बाणेन हन्यते वाली'ति वाक्यघटकीभूतकरणतृतीयाया व्यापारमात्रमर्थः। तत्र प्रकृत्यर्थस्य निष्ठत्वसम्बन्धेनान्वयः, तस्य च व्यापारस्य जन्यत्वसम्बन्धेन हन्धात्वर्थतावच्छेदफलेऽन्वयः, तथा च नागेशमते रामाऽभिन्नकर्तृवृत्तिव्यापारजन्यो बाणव्यापारजन्य एकत्वावच्छिन्नवालिनिष्ठः प्राणवियोग इति शाब्दबोधः सम्पद्यते इति दिक्॥

३९—(प्र०) प्रतिपदव्यावृत्तिप्रदर्शनपूर्वकं सम्प्रदानलक्षणं परिष्करणीयं, "रजकस्य वस्त्रं ददाति—" "रजकायवे" त्यत्र सप्रमाणं ग्रन्थकृत्सिद्धान्तं प्रदर्श्य कर्मत्वसम्प्रदानत्वयोर्भेदं विविच्य तादर्थ्यचतुर्थ्या सम्प्रदानसंज्ञाप्रयोज्यचतुर्थ्याः कुतो न गतार्थतेति स्पष्टं सर्वमुपपादयन्तु।

(उ०) सम्प्रदानत्वं तावत् क्रियाकर्मसम्बन्धजनकमंवृत्तिफलभागित्वप्रकारकेच्छीयविशेष्यताश्रयत्वात्मकं, "ब्राह्मणाय गां ददाती"त्यत्र दाधात्वर्थः परस्वजनकस्वस्वत्वध्वंसावच्छिन्नेच्छात्मकस्त्यागस्तथाच तादृशक्रियाकर्मसम्बन्धजन्यं फलं स्वस्व-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्वध्वंसविशिष्टपरस्वत्वं तत्फलभागित्वप्रकारकेच्छीयविशेष्यताया ब्राह्मणे सत्वादुपपद्यते सम्प्रदानत्वम् ।

सम्प्रदानत्वकर्मत्वयो: क्रियाकर्मसम्बन्धजन्यकर्मवृत्तिफलभागित्वप्रकारकेच्छीयविशेष्यतावत्त्वत्वेन प्रकृतधात्वर्थव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वप्रकारकेच्छीयविशेष्यतावत्त्वत्वेन भेद: स्पष्ट एव ।

यद्यपि "रजकाय वस्त्रं ददाति" इति प्रयोगो नोचित:, तत्रान्वर्थसंज्ञाबललब्धस्वस्वत्वध्वंसविशिष्टपरस्वत्वानुकूलेच्छात्मकत्यागस्याभावात्, किन्तु आप्तप्रकारीय प्रयोगमनुसन्धाय रजककर्तृकनिर्णेजनेच्छाप्रकाशव्यापारात्मकायत्तीकरणरूपं दाधातोर्गौणार्थमादाय चतुर्थी समाधातव्येति दिक् ।

यद्यपि दानस्य ब्राह्मणार्थत्वेन तादर्थ्यचतुर्थ्या गतार्था भवितुमर्हति सम्प्रदानप्रयोज्यचतुर्थी, तथापि सूक्ष्मेक्षिकया दानकर्मणोगवादेर्ब्राह्मणार्थत्वेऽपि दानक्रियाया: परलोकार्थत्वात् सत्यां तादर्थ्यचतुर्थ्या तदन्तार्थस्य दानक्रियाया–मन्वयानापत्त्या कारकत्वानापत्तेरधिकं तु हेलाराजीयादौ स्पष्टमिति दिक् ।

४०—(प्र०) प्रतिपदव्यावृत्तिप्रदर्शनपूर्वकमपादानलक्षणं नागेशदिशा परिष्करणीयं. "गत्यनाविष्टत्वे सति तज्जन्यविभागाश्रयत्वमि"त्यपादानलक्षणं च निराकरणीयम् ? "माथुरा: पाटलिपुत्रकेभ्य आढ्यतरा:" "मेरोरयमायाति" "रूपं रसात्पृथगि"त्यादौ वास्तवसंयोगपूर्वकविश्लेषाभावात्कथमपादानत्वमित्यपि समाधातव्यम् ।

(उ० अपादानत्वं तावत्–तत्तत्कर्तृसमवेततत्तत्क्रियाजन्यप्रकृतधात्ववाच्यविभागाश्रयत्वं यथा "वृक्षात् पर्णं पतती" त्यत्राधोदेश:संयोगावच्छिन्नव्यापारस्यैव पत्धात्वर्थतया, पर्णकर्तृसमवेततत्क्रियाजन्यविभागस्य प्रकृतपत्धात्वर्थतानवच्छेदकतया, तदाश्रयत्वेन वृक्षस्यापादानत्वं सिध्यति ।

"वृक्षं त्यजति खग" इत्यत्र वृक्षस्यापादानत्ववारणाय विभागे प्रकृतधात्ववाच्यत्वनिवेश: अन्यथा तस्याप्यपादानत्वापत्ते: । "परस्परस्मान्मेषावपसरत" इत्यत्र परस्परपदार्थतत्तन्मेषस्यापादानत्वाय तत्तत्कर्तृसमवेततत्तत्क्रियाजन्यत्वं विभागे विशेषणं, तथा च तन्मेषसमवेतव्यापारजन्यप्रकृतधात्ववाच्यविभागाश्रयापरमेषस्यापादानत्वम्, अपरमेषसमवेतक्रिया जन्यप्रकृतधात्ववाच्यविभागाश्रयत्वेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तन्मेषस्यापादानत्वमिति कृत्वा तत्तद्वाचकपरस्परशब्दादपादानप्रयोज्यपञ्चमी सङ्गच्छते।

अथवा यथा ज्ञानस्य निराकारतया स्वरूपतोभानाऽसम्भवाद् विषयविशिष्टतयैव प्रतीतिर्भवति, तथैव शब्दात् शब्दविशिष्टार्थस्यैव प्रतीतिस्तथाचार्थैक्येऽपि शब्दवैशिष्ट्यभेदेनार्थस्यापि भेदोपगमात् शब्दस्वरूपोपाधिकभेदमादाय मेषपदवाच्ययोः पशुविशेषयोस्तादृशविभागजनकक्रियाश्रयत्वविवक्षा, परस्परपदवाच्ययोस्तयोर्विभागाश्रयत्वविवक्षा। तथा च मेषपदवाच्यवृत्तिक्रियाजन्यप्रकृतधात्ववाच्यविभागाश्रयत्वेन परस्परपदार्थस्यैकदैवोपपद्यतेऽपादानत्वम्।

नच तथासति शब्दोपाधिभेदमादायैवात्राऽपादानत्वसिद्धौ तदर्थं तत्तत्कर्तृसमवेततत्तत्क्रियाजन्यत्वं विभागे विशेषणतया कुतो निवेश्यत इति वाच्यं, "पर्वतात्पततोऽश्वात् पतत्यश्ववाहः" इत्यादावश्वास्यपादानत्वाय तद्विशेषणस्यावश्यकत्वात्। विभागस्य द्विष्ठत्वेनैतादृशस्यापादानत्वस्य पर्णेऽपि सत्त्वात् 'वृक्षात्पर्णं पतती"त्यत्र पर्णस्याप्यपादानत्वापत्तिरिति वाच्यं, तथासत्यपि व्याकरणशास्त्रे संज्ञाया एव तत्प्रयोज्यकार्यनिर्वाहकतयाऽपादानसंज्ञाम्प्रबाध्य कारकविभक्तेरेव प्रवृत्तौ क्षत्यभावात्।

प्रकृते वास्तवसंश्लेषपूर्वकवास्तवविभागस्याग्रहणात्, बुद्धिविषयतापन्नसंश्लेषपूर्वकबुद्धिविषयतापन्नविभागसाधारण्येन तादृशविभागमात्रस्य ग्रहणादथ च तज्जनकव्यापारस्यापि बुद्धिपरिकल्पितस्य ग्रहणाद् दर्शितप्रयोगेषु सर्वत्र बुद्धिपरिकल्पिततादृशविभागाश्रयत्वेनाऽपादानत्वमुपपादनीयम्।

गत्यनाविष्टत्वे सति तज्जन्यविभागाश्रयत्वात्मकमपादानत्वं तु न समीचीनं "परस्परस्मान्मेषावपसरतः" "पर्वतात् पततोऽश्वात् पतत्यश्ववाहः" इत्युभयत्र परस्परपदवाच्यमेषयोरश्वस्य चापादानत्वानापत्तेः, यतस्तेषां तादृशविभागजनकक्रियाश्रयत्वात्।

अपसरत इति घटकीभूतसृधातुना विभागजनकक्रियाद्वयस्य बोधनादेकमेषनिष्ठां तादृशविभागजनकक्रियामादायाऽपरमेषस्यापादानत्वम्, अपरमेषनिष्ठां तादृशविभागजनकक्रियामादाय तन्मेषस्यापादानत्वमिति समाधानन्तु "नवै तिङन्तान्येकशेषारम्भं प्रयोजयन्ति क्रियाया एकत्वात्" इति भाष्यस्वारस्येन तत्र क्रियाद्वयस्यैवाऽप्रतीत्याऽवहेलनीयमिति दिक्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४१—(प्र०) सपदकृत्यमधिकरणलक्षणमुदाहरणप्रदर्शनपूर्वकं परिष्कृत्य तद्भेदांश्चोपपाद्य "राज्ञः पुरुष" इत्यादिस्थले स्वस्वामिभावादिसम्बन्धानां द्विष्ठतया पुरुषादिपदात् कुतो न षष्ठीत्याक्षेपं सप्रमाणं प्रतिक्षिपन्तु ।

(उ०) अधिकरणत्वं तावत्–कर्तृकर्मान्यतराधीनप्रकृतधात्वर्थं फलव्यापारान्यतराश्रयत्वं, यथा "स्थाल्यां पचती"त्यत्र स्थाल्या अधिकरणत्वं, तत्राऽऽक्षिप्तकर्मीभूततण्डुलपदार्थसमवेतविक्लितिरूपफलाश्रयताया: संयोगसम्बन्धनिबन्धनायास्तण्डुलकर्माधीनाया: सत्त्वात् । एवं "कटे आस्ते" इत्यत्र आक्षिप्तकर्तृदेवदत्तसमवेताऽऽसनक्रियाश्रयताया: संयोगसम्बन्धनिबन्धनाया: कटे सत्त्वादुपपद्यतेऽधिकरणत्वम् । एवं ' मोक्षे इच्छाऽस्ती"त्यत्र कर्तृपदार्थेच्छागतसत्ताक्रियाश्रयताया विषयतासम्बन्धनिबन्धनाया इच्छाधीनाया मोक्षे सत्त्वादधिकरणत्वं विज्ञेयम् ।

एवं "तिलेषु तैलमि"त्यत्र तैलरूपकर्तृगतसत्ताश्रयताया: कृत्स्न (तिल) व्याप्तिसम्बन्धनिबन्धनायास्तैलाधीनायास्तिलेषु सत्त्वादुपपद्यतेऽधिकरणत्वमिति ।

यद्यप्यधिकरणत्वं नाना, तथापि त्रिविधं संयोगादि-विषयता–कृत्स्नव्याप्तिसम्बन्धनिबन्धनमस्तीति विज्ञेयं, तत्र प्रथमम्–औपश्लेषिकत्वात्मकम्भवति, तथाहि–उपेत्यस्याविवक्षितार्थकतया श्लेषार्थबोधनमात्रे एवोपश्लेषपदस्य तात्पर्य्यात्, तस्मात्–"तत आगत" इत्यर्थे ठक्प्रत्यये औपश्लेषिको भवति । श्लेषश्च–संयोगसमवायादिस्तथाचोपश्लेषिदपदार्थ: संयोगसमवायादिनिबन्धनाधारस्तत्त्वस्यैवौपश्लेषिकत्वपदार्थत्वात् । विषयतासम्बन्धनिबन्धनाऽऽधारस्यैव वैषयिकपदार्थतया द्वितीयं वैषयिकत्वात्मकम् । कृत्स्नव्याप्ति–सम्बन्धनिबन्धनाधारो नामाऽभिव्यापकस्तथा च तृतीयमभिव्यापकत्वात्मकं विज्ञेयमिति दिक् ।

यद्यपि स्वत्वादे: सम्बन्धस्य प्रतियोगित्वानुयोगित्वाभ्यां द्विष्ठतया यथा स्वत्वप्रतियोगिवाचकराजपदात् षष्ठी समुत्पद्यते, तथैव तादृशस्वत्वानुयोगिवाचकपुरुषपदोत्तरषष्ठ्याऽपि भाव्यं तुल्ययुक्ते:, तथापि प्रकृत्यर्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधम्प्रति मुख्यविशेष्यतासम्बन्धेन प्रत्ययजन्योपस्थिते: कारणतेति सामान्यकार्य्यकारणभावमूलिकाम् "प्रकृत्यर्थप्रत्ययार्थयो: प्रत्ययार्थस्यैव प्राधान्यमि" ति व्युत्पत्तिमनुरुध्य "राजनिरूपितस्वत्ववान् पुरुष" इति बुबोधयिषायां सम्बन्धप्रतियोगिवाचकादेव षष्ठी भवतीति निर्णेतव्यमितरथा पुरुषशब्दात् तत्र षष्ठ्युत्पत्तौ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुरुषार्थम्प्रति षष्ठ्यर्थस्याश्रयतया स्वरूपेण वा विशेषणताया आवश्यकत्वाद् व्युत्पत्ति-भङ्गस्य दुर्वारतापत्तेः।

भर्तृहरिरपि—सम्बन्धप्रतियोगिवाचकादेव—

"भेद्यभेदकयोश्चैकसम्बन्धोऽन्योन्यमिष्यते।
द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तुभेदकात्॥"

इति कारिकया षष्ठी व्युत्पादयति, यतः सम्बन्धभेदकतायाः सम्बन्धप्रतियोगिन्येव सत्त्वादिति संक्षेपः॥

४२—(प्र०) "शब्दानां जातौ शक्तिर्व्यक्तीनामानन्त्यादि"ति मतं वैयाकरणेभ्यः कथं न रोचते? जात्युपलक्षितव्यक्तिशक्तिस्वीकारे का बाधा? यथा जातिविशिष्टव्यक्तिनिरूपिता शक्तिः स्वीकृता नागेशेनेति तथा विशदं प्रतिपादयन्तु॥

(उ०) मीमांसकानामयमाशयः—

शब्दैरेव प्रतीयन्ते जातिद्रव्यगुणक्रियाः। चातुर्विध्यादमीषां तु शब्द उक्तश्चतुर्विधः॥

इति रीत्या केवलजातिवाचका अपि शब्दाः सन्तीति निर्धारणीयम्। तत्र गवादिशब्देषु जातिवाचकेषु तावद्व्यक्तीनामनुगमासम्भवात् तावद्गवादिव्यक्ति-निरूपितशक्तिस्वीकारस्यासम्भवात्, यत्किञ्चिद्गवादिव्यक्तिनिरूपितशक्तिस्वीकारे व्यक्त्यन्तरगवादिबोधस्यापि गवादिपदेभ्यो जायमानतया शाब्दबोधपदार्थोपस्थित्योर्विशेषकार्य्यकारणभावस्य ग्रह एव न स्याद्, व्यभिचारदूषणग्रासात्, अतो गवादिशब्देषु केवलगोत्वादिजातिनिरूपितशक्तिरेवास्थेया।

गामानयेत्यादिवाक्येभ्यो गोत्वादिशक्तत्वेन गवादिपदज्ञानान्तरं गोत्वादिविषयकशाब्दबोधः, तत्राऽऽनयनकर्मत्वादिषु गोत्वादिवृत्तितायाः साक्षादबाधेन स्वाश्रयवृत्तित्वसम्बन्धावच्छिन्नवृत्तितायाश्चाबाधेन सुबर्थकर्मत्वादौ स्वाश्रयवृत्तित्वसम्बन्धेनैव साकाँक्षत्वात् स्वाश्रयवृत्तित्वसम्बन्धेन गोत्वादेः कर्मत्वादावन्वये बाधकाभावात्, अनन्तरम् अनुमानादिसाम्राज्याद् गवादिकर्मताकबोधसम्भवादिति न काऽप्ययनुपपत्तिरित्यादिरीत्या मीमांसकाः स्वमतं विशदयन्ति।

किन्त्वत्रब्रूमो—"गामानये"त्यादिवाक्येभ्य आक्षेपानुमानादिसामग्रीं विनाऽपि गवादिकर्मकबोधस्यानुभवसिद्धस्यापलपितुमशक्यतया व्यक्तीनामानन्त्यात् केवलतावद्व्यक्तिनिरूपितशक्तिस्वीकारासम्भवेऽपि तावद्व्यक्त्यनुस्यूतजातेरैक्यात् तत्तज्जा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्युपलक्षिततावद्व्यक्तिनिरूपितशक्तिस्वीकारे क्षत्यभावात् । "नागृहीतविशेषणा-बुद्धिर्विशेष्य उपजायते" इति न्यायस्यापि जात्युपलक्षितव्यक्तिशक्तिस्वीकारे एव तात्पर्य्यच्चि । जात्युपलक्षितव्यक्तिनिरूपिता शक्तिरेव साधीयसीति ।

भर्तृहरिरपि—

आनन्त्येऽपि भावानामेकं कृत्वोपलक्षणम् ।
शब्दः सुकरसम्बन्धो नच व्यभिचरिष्यति ॥

इति कारिकया व्यक्तीनामानन्त्यात्स्वतोऽनुगतत्वाभावेप्यनुगतमेकं शक्यताव-च्छेदकमादायाऽनन्तव्यक्तिवाचकशब्दानां सुग्राह्यवाच्यतासम्बन्धकत्वं दर्शयति ।

शक्तिग्राहकव्याकरणोपमानकोशाप्तवाक्यव्यवहारादिषु प्रधानभूतो व्यवहारो-ऽपि प्राधान्येन व्यक्तिशक्तिमेव समुद्बोधयति ।

वस्तुतस्तु—जात्युपलक्षितव्यक्तिस्वीकारे गोपदाद् गोत्वोपलक्षितत्वेन गवादि-विषयक एव शाब्दबोधो ननु द्रव्यत्वोपलक्षितत्वेन गवादिविषयकशाब्दबोध इत्यत्र किं नियामकम् ?

नच तत्पदजन्यबोधविषयत्वप्रकारतानिरूपितविशेष्यतावच्छेदकत्वात्मकं शक्य-तावच्छेदकत्वमेव नियामकमत एव न घटपदाद् द्रव्यत्वाद्युपलक्षितघटविषयक-शाब्दबोधः, तत्र घटपदशक्यतावच्छेदकत्वाग्रहादिति वाच्यं, तथासति "द्रव्यपदाद् गुणवत्त्वादिना द्रव्यम्बोद्धव्यमि"त्याकारकाधुनिकसङ्केतमादायाऽपि द्रव्यत्वोपल-क्षितघटादिविषयकशाब्दबोधापत्तेः, तत्र घटपदशक्यतावच्छेदकत्वानपायात् । उप-लक्षणीभूतधर्मस्य शाब्दबोधविषयत्वानङ्गीकारेण घटादिपदात् घटत्वादिप्रकारता-कशाब्दबोधस्यापलापापत्तेश्च । अतो जातिविशिष्टव्यक्तिष्वेव शक्तिः स्वीकार्या । जातावपि शक्तिस्वीकारेण नोक्तदोषप्रसञ्जनशङ्काऽपि । "नह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः" इति भाष्यादपि तथैव प्रतीतेश्चेति दिक् ।

४३—(प्र०) लिङ्गसंख्याकारकादयः प्रातिपदिकार्था विभक्त्यर्था वेति विविच्य कीदृशलिङ्गं खट्वादिटाब्निर्वाहकम् ? तच्छब्दनिष्ठमर्थनिष्ठं वेति प्रतिपादयन्तु ॥

(उ०) लिङ्गन्तावत् प्रातिपादिकार्थं एव, प्रत्ययार्थत्वे "प्रकृत्यर्थनिष्ठप्रकार-तानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नम्प्रति मुख्यविशेष्यतासम्बन्धेन प्रत्ययजन्योपस्थितिः कारणमि"ति सामान्यकार्य्यकारणभावसिद्धायाः "प्रकृत्यर्थ-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमि''ति व्युत्पत्तेः स्त्रीत्वाद्यर्थस्य प्राधान्यापत्त्या "अजा खट्वा" इत्यादिभ्यः स्त्रीत्वविशिष्टाजादिविषयकशाब्दबोधस्यापलापापत्तिः ।

किञ्च वाङ्मातृदुहितृस्वसृगवादिशब्देभ्यो विनाऽपि टाबादिप्रत्ययं स्त्रीत्वाद्यर्थस्य बोधेन तदर्थं स्त्रीत्वादिलिङ्गनिरूपितशक्तेस्तेषु स्वीकरणीयतया पुनः टाबादिष्वपि स्त्रीत्वादिलिङ्गनिरूपितशक्तिकल्पने गौरवमोदकाऽऽदानापत्तिः ।

"ऋकारान्ताः मातृदुहितृस्वसृयातृननान्दर" इत्यादिलिङ्गानुशासनसूत्राण्यपि प्रकृतिष्वेव लिङ्गादिशक्तिं शिक्षयन्ति ।

लिङ्गस्य प्रकृत्यर्थत्वादेव "क्तदिकारादक्तिनः" इत्यत्र "अक्तिनि''त्यस्य सार्थक्यम् । अन्यथा क्तिनैव स्त्रीत्वस्योक्तत्वान्न ङीपोऽप्राप्तेस्तद्वैयर्थ्यापत्तेः ।

सच तथासति प्रकृत्यैव स्त्रीत्वस्योक्तत्वात् कथं टाबादिप्रत्ययानां प्रवृत्तिः स्यादिति वाच्यं, टाबादिविधिवैयर्थ्यभिया प्रकृत्युक्तार्थेऽपि द्वावित्यादिवत्–प्रकृतेऽपि टाबादिप्रत्ययसौलभ्यात् । अतो टाबादयो द्योतका लिङ्गस्य ननु वाचका इति ।

यद्यपि नैयायिकादयोऽनन्तप्रकृतीनां संख्याशक्ततावच्छेदकवत्त्वकल्पने गौरवात् तदपेक्षयाऽल्पविभक्तिवृत्तिधर्माणामेव संख्याशक्ततावच्छेदकत्वं कल्पयन्ति ।

किन्तु "दधिमध्वानये''त्यादितो विभक्तिं विनापि विभक्तिलोपानुसन्धानशून्यजनसाधारण्येनैकत्वादिसंख्याबोधादन्वयव्यतिरेकसिद्धसंख्यावाचकत्वं विभक्तिप्रकृतिष्वेव निर्धारणीयम् । पाणिनिसङ्केतसम्बन्धेन प्रातिपदिकसंज्ञावत्त्वस्य सङ्ख्याशक्ततावच्छेदकत्वम्प्रकल्प्यान्याहृशस्य वाऽनुगतस्य शक्ततावच्छेदकत्वम्प्रकल्प्य गौरवादिशङ्कापरिहरणीयेत्येव वरम् । अत एव "आदिर्ञिटुडवः" इति सूत्रे बहुत्वार्थेऽप्यादिरित्यत्रैकवचनम्प्रतीयते, अन्यथा जसं विना नामार्थबहुत्वप्रतीत्यनापत्तेः ।

अनेनैव पथा कारकमपि प्रातिपदिकार्थ एवास्तीति निश्चेतव्यं, "दधितिष्ठति" त्यादिभ्यः लुप्तप्रत्ययानुसन्धानशून्यानामपि कर्त्रादिकारकप्रतीतेः सर्वानुभावसिद्धत्वात् । एतत् सर्वं सरूपसूत्रभाष्ये च स्पष्टमेवेति ।

यद्यपि—"स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः ।
उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥

इति लक्षणलक्षितं स्तनभगादिमत्त्वात्मकावयवसंस्थानविशेषात्मकं स्त्रीलिङ्गं, लिङ्गवत्त्वात्मकावयवसंस्थानविशेषात्मकम्पुंस्त्वं, भगलिङ्गाभाववत्त्वे सति तत्साहृ-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्र्यात्मकं नपुंसकत्वम्प्रतीयते, किन्त्वेतादृशलौकिकलिङ्गतो व्याकरणशास्त्रे नोपयोगो भविता यतस्तस्याचेतनखट्वामालाप्रभृतिषु बाधात् तेभ्यः स्त्रीप्रत्ययानापत्तेः, दारानित्यादौ नत्वानापत्तेश्चाऽतः सत्त्वरजस्तमसां प्राकृतगुणानां वृद्धिः पुंस्त्वं, तेषामपचयः स्त्रीत्वं, तेषां स्थितिमात्रं नपुंसकत्वमिति शास्त्रीयलिङ्गमादायैव व्याकरणकार्य्यं निष्पाद्यम् ।

अत एवोत्कर्षापकर्षसाम्यात्मकावस्थात्रयसाधारणस्थितिमात्रं विवक्षित्वा सामान्ये नपुंसकमिति शास्त्रमपि चरितार्थम्भवति । इदमवस्थात्रयात्मकञ्च लिङ्गं सर्वत्र विद्यमानत्वेन केवलान्वयीत्युच्यते । "अयं पदार्थः" इयं व्यक्तिः "इदं वस्तु" इति व्यवहारस्य सर्ववस्तुसाधारण्यात् ।

तच्चेदमर्थनिष्ठं सदेव शब्दपरिच्छेदकम् "एकार्थे शब्दान्यत्वाद्दृष्टं लिङ्गान्यत्वमवयवान्यत्वाच्चे"ति भाष्येणैकस्मिन्नर्थे "पुष्यः" "तारका" "नक्षत्रमि"त्यादिशब्दनानात्वदर्शनात्, कुटीकुटीरादौ रेफाद्यवयवोपजनने लिङ्गभेददर्शनाच्च स्तनकेशाद्यतिरिक्तमेव लिङ्गमित्यर्थ इति कैयटग्रन्थेन च तथैव प्रतीतेः। "पुंलिङ्गः शब्द" इत्यादिव्यवहारस्तु–वाच्यवाचकाभेदोपचारमादाय सम्पादनीयः ।

नचैवम्—उपचयादिधर्माणां विरुद्धतयैकत्र समावेशासम्भवादेकस्य द्वित्रलिङ्गत्वं तथासति कथं स्यादिति वाच्यं, "कश्चिदपि सत्त्वादिधर्मः क्वचन मुहूर्तमपि नावतिष्ठते, यावदनेन वर्द्धितव्यमपायेन वा युज्यते" इति प्रभृतिभाष्येण एकैकस्मिन्नपि वस्तुनि क्षणभेदेन त्रयाणामपि धर्माणां समावेशस्य द्योतितत्वात् ।

तथा च कश्चिच्छब्द एकलिङ्गविशिष्टे एवार्थे प्रयोज्यः, कश्चित्तु द्विलिङ्गविशिष्टेऽर्थे, कश्चित्तु त्रिलिङ्ग एवार्थे–इत्यत्र किं नियामकमिति जिज्ञासायाम् —"अवश्यं तावत् कश्चित् स्वकृतान्त आस्थेय" इति भाष्यरीत्या वृद्ध्यादिशब्दवत्–पुंस्त्रीनपुंसकशब्दानां सङ्केतबोधकस्य लिङ्गानुशासनस्यैव नियामकत्वमाकलनीयम् ।

सतिसम्भवे च क्वचिच्छास्त्रे लौकिकलिङ्गमप्याश्रीयते—यथा "पशुनायजेते"त्यत्र । तत्र शास्त्रीयलिङ्गस्वीकारे स्त्रीपशुव्यक्तावपि सत्त्वाद्युपचयात्मकपुंस्त्वानपायात् "आङोनाऽस्त्रियामिति" सूत्रप्रवृत्तेः सौलभ्येन स्त्रीपशोरालम्भनस्यापि विधेयत्वापत्तेरित्येतन्मीमांसाशास्त्र बहुप्रपञ्चितमिति दिक् ।

४४—(प्र०) पदार्थानामिव पदानां शाब्दबोधे भासमानत्वे का युक्तिः?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

किञ्च तत्र प्रमाणम् ? भासमानत्वे चापतन्तो दोषाः कथं समुद्धरणीया इति स्पष्टं सर्वमाचक्ष्वाम् ।

(उ०) अयमाशयो न कोऽपि तथाविधः शाब्दबोधोऽस्ति यः शब्दस्य विषयितालक्षणसम्बन्धं विना भासेत, अर्थादनुव्यवसायो यथाऽर्थेन विशिष्टं व्यवसायात्मकज्ञानं विषयीकुरुते, तथैव शब्देन विशिष्टमेवार्थं व्यवसायात्मकं सकलमपि ज्ञानं विषयीकुरुते, अत एव घटोऽस्ति पटोऽस्तीत्यादिवाक्यश्रवणानन्तरं शाब्दबोधे जाते घटं शाब्दयामीद्याकारकानुव्यवसायो जायते, तत्रार्थस्य विषयविषया भानं तु सर्वानुभवसिद्धमेव, किन्तु तत्रार्थे शब्दोऽपि प्रकारतया भासते इति विज्ञातव्यं, यतः यः शब्दो ज्ञातः सन्नर्थमुपस्थापयति स एव भासते नत्वज्ञात इति, अत एव "घटोऽस्ती"ति वाक्यजन्यशाब्दबोधे घटशब्दस्यैव मानं नतु कलशशब्दस्यापीति । तथा च शब्दस्य शाब्दबोधे नैयत्येन भाने निश्चिते शब्दोऽपि तावत् प्रातिपदिकार्थोऽस्तीत्यङ्गीकरणीयम्, अन्यथा "विष्णुमुच्चारये"त्यादौ विष्णुशब्दस्यार्थान्तरकत्वाभावेनान्वयानुपपत्त्या शाब्दबोधस्यैवासङ्गत्यापत्तेः ।

न च तत्र स्ववाच्यवाचकत्वसम्बन्धरूपलक्षणया विष्णुशब्दस्य शाब्दबोधे भानादिकं भविष्यतीति वाच्यं निरुक्तलक्षणास्वीकारे शक्तिस्वीकारापत्तेः, तयोरभेदात् ।

अथ च—जबगडदशमुच्चारयेत्यादौ शक्यार्थाऽग्रहेण शक्यसम्बन्धरूपलक्षणाया असम्भवाच्च । अत एवानुकरणानुकार्ययोर्भेदविवक्षापक्षेऽनुकार्यस्य पदानुपस्थिततया तत्र शक्तौ स्वीकृतायां स्वसदृशशब्दमात्रबोधतात्पर्यकोच्चारणविषयत्वेन शब्दस्यानुकरणत्वं सिध्यति । स्वसदृशशब्दप्रतिपाद्यत्वे सति शब्दत्वेनानुकार्यत्वञ्चानुक्रियमाणस्य सिध्यति । तथाचाश्रयतासम्बन्धेन शब्दस्यापि वृत्तिमत्तया तस्याप्युपस्थितावश्यं शाब्दबोधविषयत्वमङ्गीकरणीयम् । तथाचानुकार्यशब्दस्वरूपार्थमादायानुकरणस्यार्थवत्त्वेन प्रातिपदिकसञ्ज्ञायां स्वाद्युत्पत्तिरपि प्रतिफलति । अत एव "भुवो वुगलुङ्लिटोरि"त्यादि निर्देशोऽपि सङ्गच्छते । अभेदपक्षे च भू सत्तायामित्यादिनिर्देशोऽपि सङ्गच्छते ।

भर्तृहरिरपि—

"ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा ।
तथैव सर्वशब्दानामेते पृथगवस्थिते ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

"विषतत्वमनादृत्य शब्दैर्नार्थं प्रकाश्यते" ।

इति प्रभृतिनिजवचोनिचयेन तेजोदृष्टान्तमादाय तथा तेजसोऽर्थंसन्निधाने ग्राहकत्वग्राह्यत्वशक्तिद्वयं, तदभावे च केवलग्राह्यत्वमेव, तथैव शब्दस्याप्यर्थाबाधे सति ग्राहकत्वग्राह्यत्वशक्तिद्वयम् अर्थंबोधे तु केवलग्राह्यत्वमेवेति प्रतिपाद्य शब्दजन्यार्थबोधत्वस्य शब्दविषयकत्वाव्याप्यमेवन्ते उपसंजहार ।

ननु "नसोऽस्ति प्रत्ययेलोके"इत्यादिना किं शब्दवाच्यार्थविषयकज्ञानत्वावच्छेदेन शब्दविषयकत्वं साध्यते, किंवा शब्दवाच्यार्थविषयकशाब्दबोधत्वावच्छेदेन शब्दविषयकत्वं साध्यते, किंवा शब्दवाच्यार्थविषयकयत्किञ्चिच्छाब्दबोधे शब्दविषयकत्वं साध्यते । न तावत् प्रथमःकल्पः, घटादिप्रत्यक्षसामग्रीकाले शब्दे सन्निकर्षाभानासम्भवात् एवं घटानुमितिसामग्रीकाले शब्दे व्याप्तिग्रहाद्यभावेनानुमितौ शब्दभानासम्भवात् । एवं प्रत्यक्षानुमित्यनन्तरं "घटसाक्षात्करोमि" "घटशब्दमनुमिनोमि" इत्यनुवसायाऽभावेन प्रत्यक्षानुमित्योः शब्दभाने प्रमाणाभावात् ।

नापि द्वितीयः कल्पः घटपदज्ञानजन्योपस्थितेः पदविषयकत्वाभावे शाब्देऽपि तद्भानासम्भवात् । नापि तृतीयः कल्पः, विष्णुमुच्चारय्येत्यादितो लक्षणया शाब्दयोगे शब्दविषयकत्वस्वीकारात् सिद्धसाधनापत्तेः । इति चेन्न, "वृद्धिरादैच" इति सूत्रनिर्देशेनैव "ओमित्येकांक्षरंब्रह्म" इति श्रौतव्यवहारबलेन च शब्दार्थयोस्तादात्म्यादेव सर्वत्र तद्भानसम्भवादधिकमन्यत्र विस्तर इति दिक् ।

४५—(प्र०) अपदं न प्रयुञ्जीतेति भाष्याम् "भूसत्तायामि"त्यत्र भूइत्यस्य कुतो नासाधुत्वं कीदृशं साधुत्वस्वरुपमिति प्रतिपदव्यावृत्तिप्रदर्शनपूर्वकं विशदनीयम् ॥

(उ०) यद्यप्यभेदपक्षेऽर्थवत्त्वाभावेन प्रातिपादिसंज्ञादिकार्य्याभावे केवलस्य 'भू' इत्यस्य पदत्वाभावात्स्थूलदृशाऽसाधुत्वम्प्रतिभाति, तथापि अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वस्यैव व्याकरणोपयोगिसाधुत्वपदार्थतया तस्य तत्राक्षतत्वात् साधुत्वमेव ।

"देवदत्तो भवती"त्यत्र "तिङतिङः" इति सूत्रेण निघाते जातेऽप्यतिङन्ताव्यवहितोत्तरत्वविशिष्टतिङन्तत्वरूपोद्देश्यतावच्छेदकाक्रान्तत्वस्य तत्र सत्त्वादसाधुत्वापत्तिभयाऽप्रवृत्तत्वं विधौ विशेषणं दत्तं, तथाच तत्र निघातविधेः प्रागेव प्रवृत्ते

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

र्नासाधुत्वभीतिः । सेद्धेत्यादौ "स्वरति" इत्यादिसूत्रस्य वैकल्पिकतया पाक्षिक-प्रवृत्तौ तत्रासाधुत्वनिराकरणाय विधौ नित्यत्वमिति विशेषणं दत्तम्, रामसु इत्यत्र साधुत्ववारणाय विशेष्यदलमधिकमन्यत्र स्पष्टमिति दिक् ।

४६—(प्र०) समासे शक्त्यनङ्गीकर्तॄणां नैयायिकानाम्मतं सतात्पर्य्यमुप-पाद्य युक्तिप्रमाणाभ्यां तन्मतं शाब्दिकदिशा निराकरणीयम् ।

(उ०) नैयायिकानामयमाशयः—"राजपुरुषः" इति प्रभृतिसमासे न खलु अतिरिक्ता विशिष्टशक्तिः, किन्तु नामार्थयोः साक्षाद्भेदान्वयस्याव्युत्पन्नतया राज-पदस्य राजसम्बन्धिनि लक्षणां निधाय "राजपुरुष" इत्यादिभ्यो राजसम्बन्ध्यभिन्न पुरुषादिविषयकशाब्दबोधः सम्पादनीय इति । राजपदस्य राजसम्बन्धिनि लक्षणायां राजरूपार्थस्य राजपदार्थतावच्छेदकतया "पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेने" ति व्युत्पत्तिमनुरुध्य न तत्र पदार्थान्तरस्यान्वयसम्भवः । "सविशेषणानां वृत्तिर्न" "वृत्तस्य च विशेषणयोगी ने" त्यभियुक्तोक्तेश्च ।

न च समासे विशिष्टां शक्तिमस्वीकृत्य व्यपेक्षापक्षस्यादरे घनश्यामेत्यादिशब्देभ्यो घनसदृशश्यामाद्यर्थबोधनायेवादिशब्दसमवधानमावश्यकम्भवेत्, विशिष्टशक्तिस्वीकारे तु सादृश्याद्यर्थसंवलितघनसदृशश्यामादिनिरूपितशक्तेरेव घनश्यादिशब्देषु सत्त्वान्न सादृश्याद्यर्थबोधनाय इवादिशब्दसमावधानमावश्यकम्भवतीति वाच्यं, घनपदस्य घन-सदृशे लक्षणास्वीकारेणैव सामञ्जस्यात् । "निष्कौशाम्बिरि" त्यत्रापि कौशाम्ब्य-धिकरणकनिष्क्रमणकर्तरि कौशाम्बीपदस्य लक्षणास्वीकारेण निःशब्दस्य च तत्ता-त्पर्य्यग्राहकत्वोपगमेन सर्वसामञ्जस्योपपत्तेः ।

नापि विलक्षणविलक्षणार्थबोधाय "विभाषे" ति सूत्रमप्यावश्यकं, "राजसम्ब-न्ध्यभिन्न पुरुष" इति बुबोधयिषायां समासस्य, "राजनिरूपितस्वत्ववान् पुरुष" बुबोधयिषायां विग्रहस्य च प्रयोगनियमसम्भावात् ।

नाऽपि पङ्कजशब्ददृष्टान्तेन समासे शक्तिः साधयितुं शक्यते, पङ्कजशब्देऽवयव-शक्तिमजानतामपि ततः पङ्कजनिकर्तृपद्मबोधस्यानुभवसिद्धतया राजपुरुषादिसमा-सस्थलेऽवयवराजपदादिशक्तिग्रहाभाववताम्पुरुषाणां राजपुरुषादिपदेभ्यो राजसम्ब-न्ध्यभिन्नपुरुषादिविषयकशाब्दबोधानुदयात्, दृष्टान्तदार्ष्टान्तिकयोर्वैषम्याद्दृष्टान्तेन तथा साधयितुमशक्यत्वात् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न च "प्राप्तमुदकं यङ्ग्राममि"ति विग्रहे सति समासे निष्पन्नप्राप्तोदकशब्देन विशिष्टशक्तिस्वीकृतिमन्तरोदककर्तृकप्राप्तिकर्मीभूतग्रामविषयकशाब्दबोधो न स्यादिति वाच्यं, पूर्वपदस्य यौगिकत्वेन तत्र लक्षणास्वीकारे प्रकृतिप्रत्ययतदर्थानुसन्धानजन्य-विलम्बस्य निश्चितत्वात् तदपेक्षयोदकपदस्यैवोदककर्तृकप्राप्तिकर्मीभूतग्रामे लक्षणां स्वीकृत्य पूर्वपदस्य च तत्तात्पर्य्यग्राहकत्वमाकलय्याभीष्टबोधसम्पादनस्य सौलभ्यात्, प्रत्ययानां सन्निहितपदार्थान्वितस्वार्थबोधजनकत्वनियमानुरोधाच्चेति ।

किन्त्वत्र ब्रूमः—समासे विशिष्टशक्त्यस्वीकारे विशिष्टस्यार्थवत्त्वाभावात् प्रातिपदिकत्वं न स्यात्, अर्थवतां समुदायस्यार्थवत्त्वाभावेन "दशदाडिमानि" "षडपूपाः" "कुण्डम–जाजिनमि" त्यादिवत् ।

न च पूर्वसूत्रेण प्रातिपादिकसंज्ञाया अप्रवृत्तावप्युत्तरसूत्रेण समासग्रहणसामर्थ्यादर्थवत्समुदायात्समासादुत्तरसूत्रेण प्रातिपदिकसंज्ञा स्यादेवेति वाच्यं, "मूलकेनोपदंशमि" त्यादिवाक्यानां प्रातिपदिकत्वाभावाय, समासांशस्य नियमार्थताया आवश्यकतया तत्सामर्थ्यकल्पनाऽयोगात् ।

किञ्च समासे शक्त्यस्वीकारे शक्यसम्बन्धरूपलक्षणाया अप्यसम्भवेन लाक्षणिकार्यवत्त्वस्याऽप्यभावात् सर्वथा प्रातिपदिकसंज्ञाया अप्रवृत्तौ 'अपदं न प्रयुञ्जीते' ति भाष्यसरण्या समस्तानाम्प्रयोगस्यैव विलयापत्तेः ।

नच "तिप्तस्झि" इत्यतस्तीत्यारभ्य "ङ्योस्सुप्" इति पकारेण तिप् प्रत्याहारं संसाध्य तत्पर्युदासेन "अतिप्प्रातिपदिकमि" त्येव सूत्र्यतां, ततः समासश्चेति तत्सूत्रांशोऽस्तु नियमार्थः, तादृशसूत्रद्वयस्य तावतैव प्रयोजनसिद्धेस्तथा च सुबन्ततिङन्तान्यतरभिन्नस्य प्रातिपदिकसंज्ञाविधानेन समासस्यापि तत एवं प्रातिपदिकसंज्ञा सेत्स्यतीति वाच्यं, प्रत्येकवर्णानां प्रातिपदिकसंज्ञावारणायाऽर्थवद्ग्रहणस्यावश्य कतया समासस्य नैयायिकमते सर्वथा प्रातिपदिकसंज्ञाया गगनकुसुमायमानतापत्तेः।

तथाच प्रातिपदिकसंज्ञाकार्यमेव विशिष्टशक्तिप्रयोज्यार्थवत्त्वमनुमापयति समासेष्विति सिद्धान्तितव्यम् ।

किञ्च—नैयायिकानाम्मते समासघटकीभूतपदार्थतावच्छेदकेन सह पदार्थान्तरस्यान्वयबोधवारणाय "वृत्तस्य विशेषणयोगोने"त्यादिकं कल्पनीयं भवति, विशिष्टशक्तिस्वीकर्तृमते तु–जहत्स्वार्थावृत्ति सिद्धान्तीकृत्याऽवयवानां तत्र निरर्थकत्वाङ्गी-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कारेणं स्वत एव विशेषणान्तरान्वयवारणसम्भवात्–"वृत्तस्य च विशेषण योगोने"–त्याद्यपूर्वंकल्पनाऽनावश्यकी भवतीति रीत्याऽपि लाघवम् ।

अथ च तार्किकैः स्वमते "प्राप्तोदकोग्रामः" इत्यादिस्थले अभीष्टबोधायलक्षणाया आवश्यकतया पूर्वंपदस्य लक्षणा तादृशार्थे उत्तरपदस्य वेति विचारणायां–सन्निहित-पदार्थान्वितस्वार्थंबोधजनकत्वनियमानुसरणं "दण्डिनम्पश्ये"त्यादिस्थलमनुरुध्याव-श्यकत्वेन द्योतितं, तदप्यसमीचीनमेव । उपकुम्भमित्यादिष्वसन्निहितपूर्वंपदार्थे एव प्रत्ययार्थान्वयदर्शनात् शाब्दिकमते तु-प्रत्ययानां प्रकृत्यर्थान्वितस्यार्थंबोधजनकतानियमस्यैव सिद्धान्तसिद्धतया विशिष्टादेव स्वाद्युत्पत्तौ विशिष्टस्यैव समास्य प्रातिपदिकत्वात् प्रकृतित्वार्थंवत्त्वाच्च सर्वंसामञ्जस्यम् ।

किञ्च तन्मते सर्वंत्र वृत्तिसमानार्थंकवाक्यस्य विग्रहात्मकस्य विलयापत्तौ विवरणेन शक्तिनिर्णयो न स्यात् । अतो जहत्स्वार्था वृत्तिमादाय समासे भिन्नैव शक्तिः स्वीकरणीया । अत एव रथन्तरादिशब्देभ्यः सामवेदादेर्बोधः । नचावयवार्थंशक्तिमादायाऽजहत्स्वार्था वृत्तिमालम्ब्याऽपि रथिकादेः शाब्दिकमते बोधो दुर्वारः इति वाच्यं, "रुढिर्योगार्थंमपहरती"ति न्यायेन योगार्थापहारेण तन्मते तद्भानासम्भवात् ।

पङ्कजादिशब्दे तु "जहत्स्वार्था तु तत्रैव यत्र रुढिर्विरोधिनी" इत्यभियुक्तोक्ते-रवयवार्थंमानेऽपि क्षत्यभावादजहत्स्वार्थावृत्तिरेव तत्राङ्गीकरणीया । अतो लक्षणादिकम्प्रकल्प्यबहुव्युत्पत्तिभञ्जनमपेक्ष्य विशिष्टशक्तिस्वीकार एव समीचीन इति दिक् ।

इति दरभङ्गामण्डलमध्यवर्ति "खुटवार" ग्रामनिवासिलब्धवेदान्ताचार्यं-
तर्कतीर्थंस्वर्णंपदक–समुत्तीर्णव्याकरणन्यायवेदान्ताचार्यतर्कवेदान्त-
तीर्थं–श्रीशोभाकान्तझाशर्म्मंविरचितपरमलघुकला परिपूर्णा ।

इति शुभम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शुद्धिपत्रम्

पृष्ठाङ्काः	पङ्क्तयः	अशुद्धिः	शुद्धिः
६	२४	पारमार्थिकाभेद	पारमार्थिकभेद
१२	२७	भन्नि	भिन्न
२१	२६	लौहितः	लोहितः
३०	२३	कर्तरि	कर्तरि
३१	२०	शरीरित्व	शरीरत्व
३३	४	व्यापारस्या	व्यापारस्य
३५	१५	द्वेक	द्वयेक
४१	५	भ्यान्तरीकृत्य	भ्यन्तरीकृत्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh